CC-0. In Public Domain. Digitization by eGangotri

जयतु संस्कृतम्

सत्यहरिश्चन्द्रम्

(महाकाव्यम्)

लेखकः—

पूर्णप्रसादः, ब्राह्मणः

('नेपालीयः)

नाम् १; किं
शः तस्याः
अखण्डितां

त्'इत्यपि
ात्मनैव
ष्टकम्
रथा

91.21
RA

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयतु संस्कृतम्

नं० ६१
३२५२
सा० अ
११३

सत्यहरिश्चन्द्रम्

(महाकाव्यम्)

लेखकः—
पूर्णप्रसादः, ब्राह्मणः
(नेपालीयः)

प्रकाशकः—
श्री दोर्दण्डपराक्रमशाहः

ानाम् १; किं
ाः तस्याः
अखण्डितां
त्'इत्यपि
एकं रूप्य ?ात्मनैव
ङकम्
था

वि० सं० २००७ | एकवारम् १०००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

891.2
RRR

एतत
समर्प्यते
सत्यं परिचिचीषुभ्यः !
विश्वबन्धुत्वे जिगमिषुभ्यः !
आत्मनि मानवताम् आनिनीषुभ्यः !

मुद्रक—
सु० ऋद्धिबहादुर, मल्लः ।
जोरगणेश,प्रेस,
नेपाल।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चित वक्तव्यम् !

पौराणिकी हरिश्चन्द्रकथा, कोऽपि अतिपुरातनः समयः, तात्कालिकः सामाजिको व्यवहारप्रपञ्चश्च अस्य काव्यबन्धस्य पृष्ठभूमि.। तत् नैदंयुगीनं समीक्षणम् अत्र सहृदयानां आकर्षण दातुमलम्। स्यात्राम एतत् कथानकं काल्पनिकमेव, तथापि तदुपपाद्यस्य विश्वगीतमहिम्नो भगवतः सत्यस्य प्रत्यक्षरम् अवतरणात् अर्थवाददृष्ट्याऽपि न शक्यतेऽस्य (कथानकस्य) महान्तं महिमानम् अपलपितुम् । क्वचिदावश्यकस्थले तात्कालिकीं स्थितिमविरुध्य स्वकल्पनया च कथानकं समीकृतं वर्वर्ति।

बन्धस्य रोचकताविषये तु महात्मनस्तस्य हरिश्चन्द्रस्य
केवलं विशालताम्, महत्ताम्, उच्चताम् एव लक्षं लक्षं धावन् अहं
पार्श्वे कति स्थितानपि स्थान् अलङ्घयम्, तत् अहम् एव'
सरलतायै प्रायः पदानाम् असमासात् स्वाभावि नाम् !; किं
बन्धे शिथिलता। 'कीटाणु' 'आदर्श' 'कल्कल्' 'बर या: तस्या:
दयः शब्दाः केचित् अनुकरणाय, कतिपये सरलतायै अखण्डितां
क्लेशम् आश्रित्याऽपि प्रयुक्ताः सन्ति । किञ्च, मम
अवैयाकरणत्वेन अत्रत्याः तद्विषयाः त्रुटयः दृश्येरन्, त्'इत्यपि
पठितलघुकौमुदिका बालका एव स्वयं पुस्तके संशोध्य त्मनैव
इति आशासे । साहित्यदर्पणादौ लिखितानां लक्षणान् उकम्
अलङ्कारणां च एकतन्त्रे शासने नियन्त्र्य अवस्थानं तु सत्यं था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्महत्या एव इति तां तां त्रुटिं दर्शं दर्शम् अपि गजनिमो-
लिकाम् समाश्रयम् ।

ये नाम संस्कृते, आंग्लभाषायां वा तत्रत्येषु धर्मशास्त्र, साहित्य, दर्शन, विज्ञान, समाजशास्त्रादिषु पण्डितंमन्या गर्वदृशा प्रतियोगिताभावेन समालोचयितुम् आगच्छेयुः, न तान् मत्काव्यं स्वागतयिष्यति । यत इदं सर्वत्र निर्बलं कृशं च अस्ति । नच अहं साहित्यिकीं धार्मिकीं, दार्शनिकीं, सामाजिकीं वा ऐकदेशिकीं काञ्चित् संकीर्णतां पुष्टयितुं सयत्नोऽस्मि । यत् किञ्चित् अपि स्वं ज्ञानं महात्मनो हरिश्चन्द्रस्य अनुकरणीयतया सत्याय एव समर्पितं, नोऽवशेषितम् अहम्मन्यैः समालोचकैः वाग्युद्धाय । मत्काव्ये स्वागतम् अस्ति, आगच्छन्तु च ते,—ये महात्मानं हरिश्चन्द्रं जिज्ञासन्ते, दिदृक्षन्ति, अनुचिकीर्षन्ति, तद्भावे जिगमिषन्ति वा । परम् एतावत्तु तैः प्राक् अवधार्यम्-न तैः मम अल्पविद्वत्ताम्, रचनादौष्ठवं वा विलो- ...न्तव्यम्, यतः अत्र अन्यत् एव अस्ति सूक्ष्मं समीक्षित- ...यं च—महात्मनो राजर्षेः दिव्या सत्यभक्तिः, अचिन्त्यः ...तमात्रे महनीयः स्वात्मभावः, योगिदुर्लभा साम्यबुद्धिः, ...ः अपि अनुकरणीया जीवसेवा, तथा राज्ञः प्रजावात्स- ... प्रजानाम् राजभक्तिश्च ।

...वादर्शो, स्वसंस्कृतौ च गर्वशून्याः, केचन मूर्ख- ...सः मत्समीपे एवम् अपि प्रश्नम् अकुर्वन्;— 'किं त्वया ...लिता, आदृताश्च अन्यान्या भाषा अनादृत्य मृतभाषायाम् एतावान् यत्नव्ययः कृत इति । अनादृतानाम् आदरः, पतिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 नं० ३२५५२

नाम् उद्धारः, दलितानाम् सत्क्रिया सहानुभूतिश्च इत्येष एव नवसंसारस्य विद्वत्तायाः, सभ्यतायाः, जागृतेश्च सन्देश-महिमा ! किञ्च, नाऽद्यावधि तु अस्माकं शरीरशिरासु सांस्कृतिकस्य रक्तस्य प्रध्वंसाभावः ! , यतः स्वसंस्कृतेः मूलाधिष्ठात्रीं सृष्टौ आद्यां स्वःसन्देशवाहिनीम्, सर्वप्रथमम् अज्ञानान्धस्य मानवजगतः ज्ञानालोकप्रचारिणीम्, त्रिकालावच्छेदेन जगति शान्तिस्वस्तिपथस्य प्रवर्तिकाम् भगवतीं संस्कृतमातरम् वयं न श्रद्दधीमहि, तत्प्रचारेण तद्दर्शितया लोकोध्दारदिशा च हनिष्यमाणस्वार्थानाम् भोगवादिनां भयेन सतीमपि तद्गुणस्तुतिं न कुर्वीमहि, न वा भक्त्या सेवेमहि !

संस्कृतमातुः मृतत्वे तु न जाने कस्य स्यात् दोषः ?--स्वत्वज्ञानशून्यानाम्, सर्वत्र (वृत्तौ, भाषायां, विचारे च) सर्वतोभावेन परदासतां वोढुम् अलज्जमानानाम्, काकवत् उदरपूर्त्येकलक्षाणाम्, आदर्शशत्रूणाम्, हिन्दूव्यपदेश्यानाम्, तत्रापि तद्रसेनैव जीवताम्, पण्डितब्रुवाणाम् पुत्रहतकानाम् ?; किं वा तध्दितायैव प्रयासं प्रयासं व्ययितस्वसारायाः तस्याः मातुः ? चित्रीये अहं तेषां तथा ब्रुवतां जिह्वाम् अखण्डितां वीक्ष्य !

'नहि संस्कृतभाषा आधुनिकसंसारे कार्याय भवेत्'इत्यपि केषाञ्चित् बालभाषितं श्रूयते । परम् इदम् तैः स्वात्मनैव असंमन्त्र्य, केवलं स्वाम् विक्षिप्ततां साक्षात्कारयितुम् उक्तम् इव लक्ष्यते, यतः कोऽभिप्रायः तद्वाक्यस्य--संस्कृतभाषया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभूतार्थोपार्जनं न भवेत् इति ? किं वा संस्कृतभाषायाम् ग्राह्यम् एव किञ्चित् नास्तीति ? आद्यपक्षे--युक्तं तत्, न हि संस्कृतभाषा कस्यचित् वर्गस्य शोषेण स्वार्थ कोषभरणाय अनुमन्यते, सा तु भगवती--'तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यचित् धनम्' इत्येव अनुशास्ति । तस्या ईदृशम् अपि स्वर्णशासनं ये स्वार्थाय दूषयन्ति, तेऽस्माकं दूरत एव नमस्कार्याः। द्वितीयपक्षे—प्राचीना अर्वाचीना वा ये भुवि सन्तो महात्मानो जाताः—'राम, कृष्ण, बुद्ध, ईसा, कन्फ्यूशियस टाल्स्टाय, लेनिन, गान्धी' इत्यादयः, न एते सर्वेऽपि तथा लोकक्षेमाय कञ्चित् नवं सन्देशं स्वमस्तिष्कात् उद्भावयन्, यत् भगवत्याः संस्कृतमातुः रत्नकुक्षेः अनुत्पन्नं स्यात् । मुक्तकण्ठं, निःशङ्कं च एतावत् अपि वक्तुं शक्यते, न वा भविष्येऽपि जनिष्यमाणाः केचन महात्मानः लोकशान्त्यै विश्वभावनां प्रचारयितुं ताम्, तद्भावानुवादिनीं काञ्चित् पंक्तिं वा अननुरुध्य किञ्चित् नवम् उपदेष्टुं पारयिष्यन्ते । किञ्च, सामाजिकेन दृष्टिकोणेन दृष्टेऽपि—संस्कृतकालेऽपि न वेनसदृशाः समाजकण्टका निरङ्कुशाः शासकाः सदा 'नराणां च नरेन्द्रोऽहं' इति भावनया स्वस्तिमन्तोऽवस्थापिताः।नच अनन्तजनसंख्ये रामराज्ये एकस्य क्षुद्ररजकस्येति युक्तिमती अपि वार्ता उपेक्षिता इत्यादि । नहि लोकक्षेमौपयिका आध्यात्मिका भावातिशयास्तु भाविनीष्वपि परःसहस्राब्दीषु क्वचिदन्यत्र अन्वेष्टव्याः ।

वस्तुतस्तु-या काऽपि च भाषा स्यात्, सा केवलं वक्तुरेव भावं व्यनक्ति, भावस्य सौष्ठवे दौष्ठवे वा कथं नाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा उत्तरदायिनी ? तथात्वेऽपि 'यत्र विश्वं भवत्येकं नीडम्, 'वसुधैव कुटुम्बकम्' इत्यादेः विश्वबन्धुतायाः जगति सर्वप्रथमं सन्देशात् तु सत्यं गृहीतम गृहीतमेव भाषाराज्ये संस्कृतेन अग्र्यं स्वर्णसिंहासनम् ! तर्हि किं नास्ति ग्राह्यम् संस्कृतभाषायाम् ?

किञ्च, अभ्युपेत्याऽपि ब्रवीमि– संस्कृतभाषा कार्याय न भवेत्, क्लिष्टतया वाग्व्यवहाराय न भवेत्, ज्ञानप्रयोजनाय तु को निवारयेत् तां ऋते स्वल्पज्ञानसन्तुष्टेभ्यः ?

अलमेतेषां स्वल्पज्ञानदयनीयानाम् आक्षेपेण । युगसन्दिष्टैः प्रगतिविकासभोलैः लोकरतिनैषनवैः भावैः वञ्चयित्वा सदैव अरुचिकरायां जीर्णदशायां यत्र तत्र शिक्षालयेषु प्रदत्तं तस्या अकर्मण्यत्वापादाने यत् अस्ति जन्मतः, विनाधिकारं वा लब्धसंस्कृतशिक्षाविभागाध्यक्षत्वानां केषाञ्चित् परिहास्यं लज्जावहं च बुद्धिवैशद्यम्, तदेव वस्तुतः आक्षेप्यं तु ! किंवा घट्टकुटी प्रभातन्यायेन कस्तेषामपि असत्कथाभिः पुनरिह स्वलेखनीम अपवित्रयेत् !

अथवा किमेताभिः भूमिकाभिः ! विश्वबंधुवादस्य अग्रदूतिकायाम् संस्कृतभाषायाम् ममास्ति अनिवार्यो मानवतासुलभो भक्त्यतिशय । तेन अस्यामेव महात्मनः सत्यवीरस्य राजर्षे हरिश्चन्द्रस्य सत्यगाथां गीत्वा स्वरसनाम् अपावयम्, आत्मानम् आमोदयम् । अहं यदिदं लिखितवान्, न गर्वाय, न स्वाल्पविद्वत्तादर्शनाय, न राजतोषणाय, न धनाय !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपि तु केवलं सत्यप्रेरणया सत्यदेवप्रसादाय, जनतात्मने तस्मै एव स्वकृतेः समर्पणाय।

अकिञ्चिन्मूल्यस्याऽपि ममास्य भक्तबन्धस्य समादरम् अद्यत्वेऽपि केचित् गुणैकदृष्टयः करिष्यन्त्येव। मद्दौर्भाग्यात् तथाऽसम्भवे 'उत्पत्स्यते हि मम कोऽपि समानधर्मा, कालो ह्ययं निरवधिर्विपुला च पृथ्वी' ति कस्यचन कविप्रकाण्डस्य उद्गारेण सह ममाऽपि हृदयध्वनिः समवेदनतया मिलेत्, अन्यत् किं स्यात्!

अन्यत् देशसमस्यया जातु स्वस्यैव कारास्थितिः, जातु च अस्यैव काव्यस्य! इति नैतत् समाप्तचरम् अपि त्रिचतुराणि वर्षाणि वहिः प्रकाशितुम् अलभत! अपगतेऽपि तत्तत्प्रतिबन्धे, अर्थसंकटेन पुनर्विहन्यमाने मुद्रणे, यथा पेक्षितेन अर्थसाहाय्येन अनुगृह्णतः तत्र भवतो श्रीदोर्दण्डपराक्रमशाहस्य - यः आंग्लभाषायाः संस्कृतस्य च विद्वान् अस्ति, यः शाहवंशीयोऽपि सर्वथा जनतापक्षं पुष्णाति, यश्च शाहवंशे एकमात्रम् विलक्षणप्रतिभाशाली, युगविचारसंपन्नश्च अस्ति, अहम् आजीवनम् ऋणी अस्मि। जयतु संस्कृतम्!

—लेखकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकीयम् मन्तव्यम्

दर्शनाचार्यः श्री पूर्णप्रसादो 'ब्राह्मणः' अस्य काव्यस्य लेखकः। विदेशभाषया दासीकृते वर्तमानभारते, तत्राऽपि चिरम् अकुशितशिक्षे नेपाले, स्वसंस्कृतिगर्वशून्येऽधिकारिवर्गे संस्कृतभाषोत्थानविषयेऽनास्थां श्रयति, उदराय संस्कृतं, संस्कृतिं, स्वगौरवं वा सर्वमेव विक्रीय पदे पदे परलत्ताम् सोढ्वाऽपि सत्यसेवायाः अधिकारिसेवामेव बहु मन्वाने संस्कृतविद्वद्वर्गे, राज्यतः समाजात् वा कुतोऽपि असंभाविते‍ऽपि प्रोत्साहने कश्चित् संस्कृततापसः संस्कृतोद्धाराय एवं संस्कृते महाकाव्यं लिखति, प्रयस्यति चेत् सत्यमसौ देशस्यैव महान् हर्षस्य, गर्वस्य च विषयः। शब्दानाम् सरसता, सरलता, भावगम्भीरता च अस्मिन् काव्ये मिथः स्पर्धयेव रोचकतां भरन्ति। मनोवैज्ञानिकता, आधुनिकविचारप्रगतिश्च अस्य काव्यस्य द्वे विशेषते, ये पुरातनेभ्यः अन्यकृतकाव्येभ्यः अस्य आधुनिकत्वं विभेदयतः। किं बहुना, संस्कृतमातुः अमरत्वाय एतादृशाः संस्कृततापसा लेखकाः चिरं जीवेयुः इति हृदयत एव इच्छामि।

प्रकाशकः—

दोर्दण्डपराक्रमशाहः

वसन्तपुरम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचि

विषयक्रमः	सर्ग
राजस्वरूपः, वरुणात् पुत्रवरप्राप्तिश्च	प्रथमे
शिशुना राज्ञोः हर्षः, पाशिभयं च	द्वितीये
शिशोः क्रीडया राज्ञोः विनोदः, तदर्थं चिन्ता च	तृतीये
रोहितस्य पलायनम् शापात् राज्ञो रोगश्च	चतुर्थे
रोहितस्य वनात् प्रस्थानम् इन्द्रात् प्रतिबन्धश्च	पञ्चमे
यज्ञे सर्वस्वदानं, दानपूर्तये राज्ञः समयप्रार्थना च	षष्ठे
राज्ञः काशीप्रस्थानम्, प्रजाविक्षोभश्च	सप्तमे
सपरिवारस्य राज्ञो मार्गे क्लेशः	अष्टमे
काश्यां सभार्यस्य राज्ञो विक्रयः	नवमे
द्विजगृहे राज्ञ्या दास्यचर्या	दशमे
श्मशाने राज्ञः विपत्तिवर्णनम्	एकादशे
अवशिष्टकथाभागः	द्वादशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संकीर्णे स्वार्थकूपे मां मग्नं दीनं समुद्धरन् ।
विशाले विश्वबन्धुत्वे नय सत्य ! यथाद्भुतम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'प्रस्तावना'

अद्य पञ्चाम्रव्योमाक्षिवैक्रमाब्दस्य शैक्षिकम्
मध्याह्नमस्ति जगति ज्ञानविज्ञानभास्वरम् ! (१)
यद्द्योतस्येव मेकाऽत्र गणना सौरमण्डले
नेदृगर्थे मन्ददीपम् इमं सन्दीपयाम्यहम् (२)
परमद्याऽपि शैलानाम् अन्तःप्रान्तेषु गह्वराः
सन्तीदृशोऽपि यत्राऽस्ते सदा रात्रिः , सदा तमः (३)
तदर्थमेव मे यत्नः, तमसाऽऽवृतवर्त्मसु
तेषु मन्दोऽप्ययं सत्यं कश्चित् मार्गं निदेक्ष्यति (४)
किंवा शुभ्रां सत्यगाथां साक्षात् ईशमयीं स्मरन् ;
गातुं समीहे, सत्यस्य प्रियो भक्तो, न कोविदः (५)
अयं काव्यनिबन्धस्तु सत्यप्रणय एव मे
आशासे, क्षणं विज्ञान् उत्कयेत्, परिहासयेत् (६)
'साकेतो' भारतावन्याः स कुक्षी रत्नभास्वरः
यतो जाताः शूरवीराः धर्मप्राणा नृपाः पुरा (७)
जातु तत्राऽरुणो नाम सूर्यवंश्यो नृपोऽभवत्
सत्यव्रतस्तस्य पुत्रश्चाऽसीत् सौन्दर्यदैवतः (८)
स एकदा राजमार्गे नवोढां विप्रयोषितम्
वीक्ष्य कामवशीभूतो यौवनान्धो जहार ताम् (९)
तेन क्रुद्धो नृपः पुत्रं पुरात् निर्वास्य, एकणे
संस्थाप्य , स्वयमुद्विग्नः प्रययौ तपसे वनम् (१०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पक्कणस्थो राजपुत्रः स्वस्य निर्वासने धियम्
ददतः स्वगुरोश्चाऽपि गां जघान पयस्विनीम् (११)
पितृक्रोधात्, विप्रपत्न्या हरणात्, गोवधात् अपि
त्रिभिर्दोषैरसौ लोके त्रिशङ्कुरिति विश्रुतः (१२)
तपस्यायै प्रयातस्य कौशिकस्य सपुत्रकाम्
पत्नीं त्रिशङ्कुर्दुर्भिक्षेऽपालयत् सदयस्तदा (१३)
स्वदुष्कृत्या स्वयं तप्तम्, आत्महत्योद्यतं च तम्
भक्तं देवी तद्वृजिनं हृत्वा राज्यमदापयत् (१४)
शोणप्रस्थाधीश्वरस्य देवरातस्य कन्यकाम्
उद्वाहयामास पुत्रं हरिश्चन्द्रं महीपतिः (१५)
समर्थे स्वसुते, राजा यियासुः सतनुर्दिवम्
इष्ट्यै गुरुं प्राह, परं सद्यः स नान्वमन्यत (१६)
अन्यक्षेमस्य रोद्धेति शतधा स्वं वृथाऽक्षिपन्
स राजा गुरुणा शप्तोऽगच्छत भूयः श्वपाकताम् (१७)
तपोनिवृत्तः पत्न्याश्च श्रुतवृत्तः स कौशिकः
नृपं प्रत्युपकुर्याम् किम् ?' इत्यपृच्छत् तथादशम् (१८)
'सदेहं स्वः नये'तीच्छां तस्य पूरयतो मुनेः
यज्ञे निमन्त्रिताः नाऽयान् वशिष्ठस्य गिरा द्विजाः (१९)
'आस्ताम्, अत्र क्रतौ कामं नागच्छन्तु द्विजव्रुवाः
तपोदीप्तस्य मे पश्येत् प्रभावाऽतिशयं जगत्' (२०)
इति सस्पर्धमात्मीयं तपः किञ्चित् वितीर्य सः
त्रिशङ्कुं सतनुं स्वर्गारोहणाय समादिशत् (२१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यहरिश्चन्द्रम्

भूपे शरीरेण दिवं प्रयाते प्रजागणो न्याय,भविष्यदक्षः
संमंत्र्य सत् संसदि राज्यसूत्रं तस्यैव पुत्राय ददौ सहर्षम्

१

ततो हरिश्चन्द्रमवाप्य योग्यं भर्तारमन्तःकरणे हसन्ती
साम्राज्यदेवी त्रपया प्रियस्य हितं नवोढेव चकाङ्क्ष मौनम्

२

किं वच्मि भूपस्य परां महत्त्वां, यं सर्वभूपेषु विविच्य मौलिम्
सापत्न्यशोकान् अपि विस्मरन्ती चिराय शिश्राय यथार्थनीतिः

३

यस्मिन् गुणग्राहिणि राजरत्ने नीत्या भुवं शासति तत्प्रजाभिः
न वृत्तयेऽजप्यत दैवनाम, न लिप्सयाऽगृह्यत रत्ननाम

४

हर्म्ये, गृहे, संसदि, पकणे वा समं प्रसादं ददतं हिमांशुम्
जिगाय पक्षद्वितयेऽप्यखण्डं तावत् प्रदानात् नृपमौलिरेष

५

पात्रानुरूपैः स्वनयप्रयोगैः नीत्या जितोऽनेन दिवाकरोऽपि
ग्रीष्मेऽपि काले सगुणेषु सत्सु नायं प्रयुङ्क्ते स्वदयोग्रनीतिम्

६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनं कुबेरस्य न लोकभूत्यै, विलासिनः स्वर्गपतेः न वज्रम्
दण्डैकवृत्तेः न यमस्य शक्तिः नवा क्वचित् पाशधरस्य पाशः

७

त्राणेन, दानेन, दमेन, जातु तटस्थवृत्त्या च विविच्य पात्रम्
शास्तारमेतं नृपमेकमेव दिक्पालशेषेण विधिः ससर्ज

८

स्वर्णैः स भृत्वैव गृहान् प्रजानां पश्चात् भविष्याय बभार कोषम्
नद्यम्बुभिः कूपचयान् अभृत्वा धाराधरः प्राक् भरते समुद्रम्

९

स निर्धनेऽभूत विभवः, सरोगे स औषधं, निष्पितृके पिता स
स निर्णयः सत्यमयो विवादे, क्वचित् सशोके स सहानुभूतिः

१०

अलक्ष्यलक्ष्याः निजकान्तयाऽपि राज्ञः स्वदेशस्य च वीरभक्ताः
धनार्चिता यस्य चरा अभूवन् उत्कोचभीता न तु कालभीताः

११

वर्णस्थितिस्तत्र कृता श्रमस्य विभाजनैरेव न जन्मना तु
स ब्राह्मणो ब्रह्म विबुध्यते यः, स क्षत्रियः क्षत्रकृतिर्य एव

१२

त्रिवर्गसेवाविधिमस्य वीक्ष्य, कालेन तां तां फलमाधुरीं च
जुघोष पश्चात् स्मृतिरर्थकाण्डे 'धर्मार्थकामाः सममेव सेव्याः'

१३

तदातपत्रस्य सुधांशुशीते छायातले शर्ममये विहृत्य
ययुः कियन्तः शिशिरा निदाघाः क्षण इव समागताः ःः प्रजानाम्

१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैत्यान् परास्तुं त्रिदिवं च गोप्तुं यं विक्रमं दर्शितवान् स युद्धे
को विस्मरेत् तं, किल देवलिप्यां स्वर्गस्य वक्षस्यधुनाऽपि स स्यात्

१५

नीत्या जगत् मोदयतोऽपि तस्य पुत्राजनेः चित्तमभूत् सशोकम्
कियत्तमो दीपकरण्डकस्याऽप्यधो भवत्येव विधेः विलासात्

१६

रत्नाकरस्योरसि वाडवाग्निः, सुधाकरेऽङ्को, नृपतौ स खेदः !
शङ्के, विशाला मिलिताः समृद्धीः एकत्र नैव क्षमते विरिञ्चिः

१७

हव्येन देवान्, सुनयेन लोकान् पितॄंश्च कव्येन सभाजयन्तम्
तं धार्मिकं वञ्चयते सुतेन, सुदुर्विभाव्यं खलु कर्मजालम् ।

१८

स्रष्टुः कलायाः प्रतिमा मयूरो दोदूयतेऽन्तः स यथा स्वपादे
तथाऽन्यतुष्टोऽपि सदा स राजा दोदूयतेऽन्तर्निजबन्ध्यभावे

१९

पीत्वेव तस्यैव रसं बलिष्ठः, मुमूर्षुणाऽपि प्रतिकार्यभूतः
स शोकरोगः तरुणो जिगाय तं प्रत्यहं वृद्धदशां प्रयान्तम्

२०

संद्रष्टुमैच्छत स तदा वशिष्ठम् तन्त्रेषु मन्त्रेषु च सिद्धहस्तम्
नरा हि दृष्टैः विफला अगत्या ह्यदृष्टवस्तु नमसि विश्वसन्ति

२१

राजा प्रजानां हृदयं, न तस्य देहेऽस्त्यनिष्टस्य कुतोऽपि शङ्का
अतः ससैन्यः किमु नाम यातु ? द्वित्रैः अगच्छत् स वनं सहायैः

२२

CC-0. In Public Domain. Digitization by eGangotri

तपोवने शान्तपथेन यान्तं नृपं सिषेवे पवनोऽनुकूलः
अलक्षिताः पक्षिगलैः अगायन् अरण्यदेव्यश्च सुमङ्गलानि

२३

दृशोः अनभ्यासवशात् रथेन मृगादिकोऽरण्यपशुः विभीयात्
इत्यात्मदर्शी नृप आविवेश स पादचारेण तपोवनान्तः

२४

श्यामा वनश्रेणिरिहैव मध्ये मध्ये च ते पर्णमयाः कुटीराः
तत्तत् कुटीरात् च स यज्ञधूमः निर्गत्य यावद्विपिनं पुनाति

२५

नानाफलैः स्वादुरसैः, सुगन्धैः पुष्पैश्च नम्रास्तरवो हि तत्र
विनश्वरे जन्मिनि सारवस्तु परार्थतैवेति निदर्शयन्ति

२६

तादृग् विशाले विभवे न किञ्चित् नियन्त्रणं वा क्षतिरस्ति तत्र
दुर्भावनानां प्रथमं सवित्री नियन्त्रणैवेति तु निर्विवादम्

२७

श्रेणीप्रवद्धाः कति तस्य मार्गेऽस्फुटप्रसूना लतिकाकुमार्यः
वातेरितैः पत्रमुखैः नृपालम् अव्यक्तशब्दा सदुदर्कमाख्यन्

२८

तपस्विनो वृक्षतलेषु केचित् कुटीषु केचिच्च गुहासु केचित्
जगद्धितायैव हुतात्मसत्वाः कृच्छ्रं तपस्यन्ति, यजन्ति चात्र

२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामं स सूर्यस्तपतात्, स मेघो वर्षेत्, स वायात् पवनः सवेगम्
पुरो नृपो गच्छतु वाऽपि दीनः, संमुद्रय नेत्राणि तपश्चरन्ति

३०

सिद्धासनीभूय, दशेन्द्रियाणि श्वासांश्च संयम्य, परां प्रबोध्य
सहस्रपर्णे कमले परेण क्रीडन्त आनन्द्य युगान् नयन्ति

३१

वस्त्राणि वल्कानि, कुशा विभूषा, जटा च सा स्वर्णमयं किरीटम् !
नमन्ति ते कस्य पुरो मृदोऽन्या भूतयः, परं स्वात्मबलं हि संपत्

३२

रम्याः कुरङ्गा अजिरे कुटीनाम् रोमन्थमावर्त्य सुखं वसन्ति
स्नेहार्पणात् तेषु हृदा मुनीन्द्रैः तत्रैव तेषां महती स्वताऽस्ति

३३

स्नेहेन नूत्नानि तृणानि दित्सूः तपस्विकन्याः सगलाभिभङ्गम्
अर्धप्ररूढैः अभिहत्य श्रृङ्गैः उत्प्लुत्य खेलन्ति कुरङ्गशावाः

३४

चींचींति माधुर्यमयैः निनादैः कर्णौ हरन्तो विहगाः स्वनीडात्
यत्राऽवतीर्णा मुनिकन्यकानां हस्तेषु नीवारकणांश्चरन्ति

३५

दत्तं प्रकृत्या परिधाय वल्कं, पयोघटं न्यस्य कटौ समोदम्
यत्राभिषिञ्चन्ति कुटीरवृक्षान् स्नेहामृतेनेव तपस्विबालाः

३६

वातेन कस्यापि दलस्य पाते, तेषां कृतेऽश्रूणि पतन्ति तासाम्
स्वर्वर्द्धितानां सहसा विपत्तौ सत्यं भवेदेव महान् विषादः !

३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते ते कुमारा यमिनाम् 'अदीनाः स्यामे'तिभावज्वलिताः प्रबुद्धाः
उन्निद्रयन्तीव शिलाः प्रसुप्ता भ्रमन्ति तत्रैव समित्कुशाय

३८

अत्रास्ति वातावरणं विशुद्धं सत्ये नियोगातिशयात् मुनीनाम्
यत्र घातुकानां मरुमानसेऽपि बन्धुत्वधीः अंकुरयत्यजस्रम्

३९

यत्र स्वतन्त्राः शुकसारिकाश्च 'द्यौः शान्ति' रित्याशिषमाननन्ति
किं तत्र शान्तिर्न हसेत्, न नृत्येत् वातेऽन्तरिक्षे, सलिले, स्थले वा

४०

वृक्षैः स्वयंसेविभिरुच्चनिष्ठैः छायाप्रबन्धात् इव शान्तिपूर्णा
तपोमही न क्षमते कदापि तापात्मनः चण्डकरस्य तापम्

तत् तादृशं पुण्यवनस्य दृश्यं पश्यन्, विमुह्यन् नृपतिः प्रदोषे
गुरोः कुटीं प्राप पलाशिवृन्दैः शाखाङ्गुलीभिः परिचायिताध्वा

४१

× × ×

लब्ध्वा हृदयेशस्य प्रणयशिशिरं तं मृदुकरस्पर्शम्
अवगुण्ठनमवतार्य तमोमयं जहर्ष रजनी देवी

४२

आलिङ्गन्त्याः प्रेष्ठं तस्याः हृदये, मुखे कुतोऽप्यमिताः
हर्षा भूमौ अपतन् यत्र तत्र सुधामयूखरूपेण

४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताराभयैः सुरत्नैः समुज्वला सा मनोहरा शाटी,
सा व्योमस्वरित् रचना, किं सा रजनी जगत् न मोहयतु !

४४

ज्योत्स्नाधवले कुट्या अजिरे निविश्य परःशता हरिणाः
अङ्के निधाय शावान् जिघ्रन्ति पुनः पुनः सवात्सल्यम्

४५

पर्णकुटीरविटङ्के नीडेषु तत्कपोतकुलं निवसत्
पक्षोत्सङ्गे शावान् न्यस्य 'माकुर माकुर' रवं तनुते

४६

यमिनो मुनयः सायंसवनान्ते कुशासनेषु निविश्य:
क्रोडे न्यस्य कुमारान् कथयन्ति पुरातनीः शुभा गाथाः

४७

एवं कुलपतिमुख्ये गुरौ अपि क्रियामनु समाप्तकथे
विनयनतः स महीपो न्यवेदयत् तं हृदो व्यथां रहसि

४८

'तपसैव विश्वहृदयं सकलं करकङ्कणवत् विदितवताम्
भवतां पुरो मया किम् उद्घाटनीयमस्ति निजं हृदयम् ?

४९

गुरुकृपया मम नान्यत् प्रार्थ्यमपूर्णं चाऽत्र वरीवर्ति
किन्त्वेको मां नित्यं दन्दह्यते निरपत्यतादहनः

५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शान्तं विपुलं राज्यं, स्निग्धा प्रकृतिः, महत्तमं स्थानम्
सर्वमपि निरपत्यस्य मम शोकायैव भवन्ति, न सुखाय

५१

पुरतस्तद्धि कुटीरम्, न तत्र पर्यङ्करल्लका, न धनम्
पर्णमयश्छदिरस्ति, तदपि शिशुखेलया किन्दुज्ज्वलितम्

५२

न मया देवाः, पितरो, लोका वाऽवहेलिता; हृदयेन
हन्त ! तथाऽपि विधातः ! अनुभवन्नस्मि कतमद् दुरितफलम्

५३

आचक्ष्व योगदृष्टे ! पत्राणीव समीक्ष्य मे चरितानि
प्रारब्धस्य विलास, एष किमुत प्राक्तनस्य कलुषस्य ?"

५४

"मागा नृपाल ! शोकं, मुनिवन्नियतेन्द्रियो वसन् विपिने
तपसाऽऽराधय वरुणं, तत आप्स्यसेऽतिपराक्रमं तनयम्

५५

यत्पुण्यमयी गाथा साम्रेडं द्युषदां च श्रुतीः स्पृशति
तद्भवतः क्षेमपथे प्रतिरोधः कथं नाम संभवति ?"

५६

× × ×

लोकान् उपकुर्वन्तं प्रत्युपकुर्वन्तीव वनप्रकृतिः
तपसः कठिने समये चारु सिषेवे स्वसंपदा नृपतिम्

५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा भोजनाय कन्दैः, परिधानाय तरुवल्कलैं रुचिरैः,
संवेशाय च मृदुलैः पलाशिदलैस्तैः सदकरोत् नृपतिम्-

५८

शान्त्या पट्टमहिष्याः, रात्रिन्दिवमङ्गरक्षकैः हिंस्रैः,
हरिणैः कोमलनृत्यैः, शुकपिकादिभिश्च गायकैः शतशः

५९

तमसा शोकमयेन जीवनकालं तमोमयं नयतः
काले किमपि मुहूर्तम् ज्योतिर्मयमग्रतोऽभवत् नृपतेः

६०

किञ्चित् दिव्यं तेजो, भौमं च्छित्वा विसृत्वरं जालम्
अन्तः प्रवेक्ष्यतीव, तत्र पवनोऽन्यथैव ववौ मृदुलः

६१

सहसा प्रादुर्भूय विकस्वरेण मधुमयस्वरूपेण
वाशी जगाद भूपम् साक्षात् सिद्धयेव तं सरस्वत्या

६२

'राजन्! भवतस्तपसा सत्यं निघ्नीकृतं मम स्वान्तम्
पाणौ मम शक्तिमये यत् वर्तते, तत् यथेच्छया वृणुहि'

६३

'यदि मयि तुष्टो देवः पुत्राभावात् अहं परं खिद्ये
पुत्रेण चन्द्रमयेन जीवननिशीथिनीं मे प्रकाशयतु

६४

भ्रमन्नपि जगदशेषं पितृऋणपञ्जरे सदा निबद्धोऽस्मि
नानन्दमनुभवामि पञ्जरशुक इव परैः जगत् भ्रमितः'

६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'राजन्' ! प्रसीद; सत्यं वदाम्यहं तव; भालतटे स विधिः
व्यस्मरत् सुतं लिखितुम् इतरशर्मपरम्परा लिखित्वाऽपि
६६

वेद्मि प्रजासु समासु जागर्ति ते पुत्रभावना मनसि
का ते पुत्रे तृष्णा ?, राजन् ! निजां तां शुचं समाधेहि
६७

किरणैः शिशिरैः स शशी, महनीयोऽस्त्यन्यसंपदां स्थानम्
किन्तु दिवाराज्येन केवलमेकेन वञ्चितो विधिना
६८

चराचरस्य जगतोऽस्य, भरणं लयं च कर्तुमलं हि जलम्
रत्नैकहेतुरपि तत्, प्रतीपगत्यैव वञ्चितो विधिना
६९

तस्मात् पुत्रं त्यक्त्वा, यत् कामयसे नृपाल ! तद्वरय
सन्त्यन्या अपि जगति तास्ता महिता विभूतयः शतशः
७०

'भालेऽलिखितं वस्तु, यदि देवा अपि नैव प्रदातुमलम्
विधिलिखितस्यैव कृते, तर्हि किमर्थं सुरा उपास्यन्ते ?
७१

अमरोत्तम ! वाग्जालैः नार्हसि शरणागतं प्रतारयितुम्
सौम्यं सुतमविलोक्य, नप्रजीवितुमुत्सहत एष जनः'
७२

'वन्ध्यत्वस्य शमाय यदि निर्बन्धं महत्तमं कुरुषे
नष्टे ऽस्मिन् वन्ध्यत्वे यष्टव्योऽहं त्वया स्वपुत्रेण'
७३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुततृषयाऽऽकुलितोऽसौ नृपोऽनुमेने तथा प्रतिज्ञानम्
दूषितकोटाणुमयं जलमविचार्यैव तृषाऽभिभूत इव

७४

प्रथमः सर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः सर्गः

दिक्सुन्दरीभिरमितैः हसितप्रकाशैः
लिप्तेव, वाऽमरवधूभिरधोरवृत्त्या
क्षिप्तैः विलासकलहे मणिरत्नचूर्णैः
ध्यातान्तरेव रजनी मधुरं जहास

१

भूमीगतं रुचिरवस्तु किमप्यपूर्वम्
उत्कण्ठया परमयाऽभिदिदृक्षतीव
तारागणोऽभिधरणीं चलचाकचक्यां
दृष्टिं क्षिपत्यविरतं नभसो गवाक्षात्

२

ज्ञात्वैव निर्जरगुरोः प्रसवानुकूलं
स्वर्गानिलः कमपि सन्दिशतीव कालम्
आसन्नसूतिसमयाम् अभिगम्य राज्ञीं
निर्याति सत्वरमसौ अवरोधरन्ध्रात्

३

आयाति मासि दशमे, रुचिरे मुहूर्ते
ज्योत्स्नाप्रसारधवले च प्रसूतिगेहे
शैव्या नृपालमहिषी सुषुवे कुमारम्
सद्भाविता मतिरिवोज्वलमात्मतोषम्

४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्यन्त एव कुशलाः प्रसवस्य कृत्ये,
राज्ञीहितं स्वहृदयेन सदाऽर्थयन्त्यः
'जातः कुमार' इति गद्गदिताः प्रमोदैः
संभ्रम्य सूतिसदने महिला अवलगन्

५

'जायेत केन विधिना जगतोऽस्य तृप्तिः
इत्येव तर्कविषयैः हृदि कृष्यमाणम्
पृथ्वीपतिं समुदिशत् सुतजन्म कोऽपि
वातो यथा सुरभिजन्म रसालवृक्षम्

६

वर्णान्यपि श्रुतिपुटे मधु वर्षयन्ति!
मन्त्र्योऽपि सन्दिशति दिव्यमपूर्वशर्म!
एतत्त्वसंभवमितीव नृपः क्षणं तु
'को मे भ्रमोऽयमिति' मौनमवाललम्बे

७

सूतेः गृहात् नरपतिं, नृपतेः अमात्यान्,
तेभ्यश्च पौरजनमित्यविलम्बमेव
प्रातस्तनो मलयवात इव प्रसर्पन्
सन्देश एष सुरभिः जगदानन्दत्

८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्निम्नगा कमलपुत्रमसूत, देवी
राज्ञी तुषारकिरणं, विनयं च विद्या
किन्त्वेतमात्मजमणिं महिषी प्रसूयाऽक-
र्षत् यथा प्रतिजगत्, नहि ता विशोकुः

९

राज्ञो मनोरथतरो : मृदुलं प्रसूनं
ज्योतिः प्रशान्तमधुरं हृदयस्य राज्याः
सत्याशिषां परिणतिर्मधुरा प्रजानां,
कस्योत्सवाय न बभूव शिशुः स जातः

१०

स्वान्तेषु, गीतिषु, गतेषु मुखेङ्गितेषु
वादेषु, हासलहरीषु च तत्प्रजानाम्
हर्षः स एव तनुते स्म विलासखेलां
चन्द्रप्रकाश इव वीचिषु निम्नगानाम्

११

हर्म्येषु, देवसदनेषु, सदोगृहेषु,
घण्टापथे, नृपपथे, जनतातनूषु
प्रत्येकमङ्गनिवहे समवाप्य भूषां
साकेतपूः अमरपूः इव दीप्तिमाप

१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नेहस्नुता च महिषी चिरजातमेतम्
उत्सङ्गरत्नमवलोक्य तदेकभावम्
याता विवेद न निजं, प्रियमर्भकं च
चित्रावहं मधुमयं समलोकि हृदयम्

१३

राजा शिशोः प्रकृतिलब्धमवार्यवृत्ति
श्रुत्वाऽपि 'च्याहँ' रुदितं परितप्यतेऽन्तः
अह्नाय सूतिगृहमेति सवाष्पकण्ठं
पृच्छत्यकारणमसौ किमु रोदितीति

१४

एवं मुदैव समयं नयतो नृपस्य
हर्म्ये सुधाधवलितेऽमितमोदपूर्णे
स्वप्नेषु निर्वृतिमयेषु यथैति जाग्रत्,
छित्रैर्दिनैः स वरुणोऽपि तथा समायात्

१५

नीडे सुधांशुधवले प्रियशावमेकं
पक्षान्तरे मृदु निधाय सुखं स्वपन्तौ
व्याध· कृपाणहृदयो द्विजदम्पती तौ
हा हन्त ! तर्जयति तीक्ष्णशरेण रात्रौ

१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वाऽपि तं द्विजसरूपतया समेतम्
संत्रस्तवान् नृपतिरस्य हृदं विजानन्
अन्तः कृपाविरहितस्य न साधुवेषः
शक्नोति दर्शकहृदं प्रणयेन भर्तुम्

१७

पाशी जगाद नृपतिं- 'नृप ! किं प्रतिज्ञां
स्मृत्वा न पूरयसि, तिष्ठसि मोदमग्नः
आत्मेव जन्मनिगडात, तुहिनात् इवाऽर्को
मुक्तोऽसि पैतृकऋणात, अथ देहि पुत्रम्

१८

बद्धाञ्जलिः विनयभारनतः स राजा
प्राह स्मितेन कृतकेन जलाधिनाथम्
'आम्, देवदेव ! भवताऽहमसीमतापात्
पाशात् विमुच्य नितरामनुकम्पितोऽस्मि

१९

किन्तु व्यथानलमुखे हृदयं समर्प्य,
स्नात्वा चिरेण करुणैः गलदश्रुपूरैः
शोकेन कल्पसदृशाः शरदोऽतिवाह्य
संप्रार्थ्य देवचरणान् मणिरेष लब्धः

२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मिन् गते सपदि तज्जननी कथं नु
तिष्ठेत विदीर्णहृदयेन कथं नु जीवेत् !

लोके हि मातृहृदयं मृदुलं; मया किं
वक्तव्यमस्ति, भगवान् स्वयमेव वेत्ति

२१

तत् प्रार्थयामि भवते- भगवन् ! परश्वः
सत्यं भविष्यति शिशोः अपि नामकर्म
तृष्णाशमाय तृषितस्य हृदो, दशोश्च
तावत् विलोकयतु पुत्रमुखं वराकी'

२२

पारुष्यपूर्णमपि तत् वरुणस्य चेतः
श्रुत्वैव तस्य वचनं प्रदिमानमाप
सप्रश्रयं मृदु वचो रचयेत् क्षणेन
दाधीचमस्थ्यपि कथैव परा हृदस्तु

२३

तस्मिन् गते नरपतिः सहसा सशङ्को
गत्वाऽमृशत् सकरुणेन करेण बालम्
झञ्झानिले व्यपगते परिशङ्कितात्मा
माली शिरां तरुमिव प्रियमेकमात्रम्

२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाणिग्रहेण क्रियते समयाय मिथ्या-
स्नेहेन दत्ततनया शिशुरित्युपेक्ष्य
देवी निजेऽत्र विपिने क गमिष्यतीति
व्याधेन दत्तपृथुका हरिणीव दृष्टा

२५

जातोऽद्य पूर्वसुकृतात् इव दुर्दिनान्तो,
भावी च सोऽस्ति घनशोक इतोऽतिदूरे
तस्मात् नृपालमहिषी प्रससाद गाढं
पुत्रेन्दुनाऽतिविमलेन शरन्निशेव

२६

स्नेहेन पूर्णहृदया महिषी तदङ्गम्
यत् यत विलोकयति, चुम्बति तत्र तत्र
उत्थाप्य वक्षसि, गले, वदने च जातु
संयोज्य तन्मुखमनन्तमुदं तनोति

२७

दिव्यान् क्षुधादिमधुरान् अनुभूतपूर्वान्
स्वप्नान् समाह्वयति, कर्षति, चुम्बतीव
स्मेरोज्ज्वलं स्वमधरं स्फुरयन् स मन्दं
बालः समुत्क्षिपति कोमलपाणिपादम्

२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देशो नवोऽपरिचितो, नव एव वेषो,
भाषा नवा, हृदयरोचकता नवैव
आयाति दृक्पथमतः स शिशुः क्षणेन
चित्रीयते, हसति, पश्यति कौतुकेन

२९

मोहावहै: मृदुभिरस्फुटितैः वचोभिः
सन्देशमेष वितितीर्षति दिव्यमत्र
किन्त्वस्य भावमधुरां न विदन्ति भाषां
लोकाः, ततः पतति, रोदिति भग्नलक्ष्यः

३०

गाढं विरक्तमपि कौतुकयत्यसीमम्
सन्तप्तचित्तमपि शीतलयत्यसीमम्
विश्वं विसारमपि भासयते ससारं
सामर्थ्यमासु शिशुकेलिषु कीदृगस्ति

३१

शङ्के-सुधा भवति वस्तुनि निष्कलङ्के,
पीत्वैव यां न विरिरंसति चित्तमेतत्
तत् निर्मलैः यतिजनैः, शिशुभिः, सरोभिः
स्पृष्टस्य नास्ति हृदयस्य यथेच्छवृत्तिः

३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पृष्ट्वा धर्तीं मलिनतां विमलीकृतेऽपि
साधोर्मनो नहि शिशोर्मनसैति साम्यम्
यत तन्मनो मलिनताभिरलब्धसङ्गम्
अस्पृष्टधूलि नवदर्पणवत् चकास्ति

३३

चञ्चत्स्मितेषु हि शिशोरधरेषु शान्तं
ज्योतिः परात्मन उदेति चकास्ति मन्दम्
तव सत्यदर्शनमहो ! हृदयं किमीयं
नो मोहयेत, न रमयेत, गमयेन्न शान्तिम् !

३४

उत्सङ्गशायिनमिमं स्तनपं स्मितास्यं
यावत् विलोकयति पूर्णमनोरथा सा
तावत् न राज्यमतुलं न च सौधमेव
सस्मार सन्ततिहृदो ह्यचलाः प्रकृत्या

३५

द्वितीयः सर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीयः सर्गः

मित्र एव कुत एष मारुतः सौरभं कुत इदं नवप्रियम् ?
एवमेव विमृशन् नृपः क्षणात् सन्ददर्श गुरुमग्तिकागतम्
१

शीघ्रमर्घ्यमुखया सपर्यया तं समर्च्य विधिसन्निभं गुरुम्
भूपतिः सविनय कृताञ्जलिः उक्तवान् तमथ भक्तिमत् वचः
२

अष्टसिद्धिमिरुपासितस्य ते मादृशः किमुपसाधयेत् प्रियम्
किं तथापि करवाणि भो ! गुरो ! शाधि शिष्यकमिमं यदृच्छया
३

आमृशन् स मुनिरेकपाणिना दुग्धफेनधवलां स्वदाढिकाम्
चालयन्नितरतश्च मालिकां स्फाटिकीं नृपतिमाह सस्मितम्
४

त्वर्यतामथ निमन्त्रणादये बान्धवस्य, नगरोत्सवाय च
प्राप्तवान् नृप ! तृतीयहायनम् पुत्र एष तव चौलमागतम्
५

भूप आह महिषीमुखं सकृत् वीक्ष्य भीत इव सूक्ष्मवेदनः
किं तृतीयमतिवाह्य हायनं चौलकर्म न विधातुमिष्यते ?
६

कामये झटिति नो पलान्यपि यान्तु, कल्पसदृशानि नित्यशः
यान्तु, तानि रजनीदिनान्यपि पूज्य ! चौलदिनमापतेदिति'
७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मर्मवित् सहृदयो मुनिः क्षणं ध्यानमग्न इव मौनमास्थितः
स्नेहपूर्णहृदयेन बालकं वीक्षमाण इदमाह भूपतिम्

८

'अस्तु तर्हि शिशुरेष वर्धताम्, चौलकर्म समये करिष्यते
हायने जननपञ्चमेऽथवा सप्तमेऽपि शुभमाह नारदः'

९

इत्युदीर्य सममग्निभिर्मुनौ ब्रह्मवर्चसमये ऽथ निर्गते
पूर्वशैल इव सूर्यनिर्गमे सौध आशु विरलप्रभो ऽभवत्

१०

एकदाऽस्फुटगिरा स्वमातरम् पृष्टवान् सकुतुकं स बालकः
'मत्प्रसूः त्वमसि,मत्पितुः प्रसूः नास्ति किं जननि! नो विलोक्यते

११

मत्पिताऽहमिव किं न रोदिति ?, याचते नच कदापि पूरिकाम् ?
कश्च सान्त्वयति तं सचुम्बितम्, ? कश्च तोषयति पूरिकां ददत् ?

१२

तन्निशम्य हसता मुखेन सा पुत्रमाह ,परिचुम्ब्य तन्मुखम्
वत्स! पुष्पनिचयं विचित्य सा पूजनाय दिवि मन्दिरे ययौ

१३

जातु पुष्पवसना प्रभामयी स्वप्नसुन्दररथेन नीरवम्
एति, ते पितरमात्मसंभ्रमैः साधु तर्पयति, साधु चुम्बति

१४

अस्ति दूरगगनस्य मध्यतो रत्नदीप्तितरलं महत् पुरम्
तत्र सन्ति कति वत्स! पूरिकाः, पर्पटा, वटकपिण्डकादयः

१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र सन्ति कनकस्य पक्षिणः, काम्रपुष्पफलिनः पलाशिनः
व्योमयायिन उदग्रवाजिनः, दन्तिनश्च बहुदन्तशोभिनः

१६

तत्र किं त्वमधुना यियासति ?, यासि चेत् अचिरतो नयाम्यहम्
तत् निशम्य सहसैव हर्षितः कौतुकात् नय नयेति सोऽब्रवीत्

१७

साऽह 'किन्तु जनकः प्रकुप्यति, नाहमेमि सुत ! तत्र सांप्रतम्
त्वां विसृज्य भट आगमिष्यति, किं मया विरहितोऽपि तिष्ठसि ?

१८

तत् निशम्य सहसा स बालको भीतभीत इव साश्रुलोचनः
गाढगाढमुपगुह्य मातरं प्राह—' नाहमपि यामि तर्हि तु '

१९

सा ततो विरहकातरं मृदु स्वात्मजस्य हृदयं विजानती
अग्रुषी च हृदयेन भाविनाम् अस्य शोकघटनां व्यदूयत

२०

भूपतिः सुतममंस्त ; सावधि पाठ्यपुस्तकमनर्घगौरवम्
येन सत्यपितृताऽनुशील्यते, सा च भूतनिवहे प्रयुज्यते

२१

साऽङ्गलक्षणततिः शतायुषः, सा च मर्मघटनाऽस्य भाविनी !
स्यात् कृतं कृतमदित्यसौ नृपः चिन्तितः, शतशः आगमा अपि

२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचयन्निव सुदूरगामिताम् स्वस्य, जीववसतिं च चञ्चलाम्
रोहितस्य पदमगतो ययौ मातुरङ्कत इतः सखीन् प्रति

२३

शिल्पिनेव कुशलेन कल्पितम्, लाञ्छितं च सकलैः सुलक्षणैः
केलिषु स्वसवगर्वि तद्वपुः सौधमेव सुसमुज्ज्वलं व्यधात्

२४

क्रीडनस्य परमप्रियः सुहृत्, आधिनाऽपरिचितः स बालकः
कूर्दते सखिभिरेकलक्ष्यकैः सौधभूपरिसरे चलत्कचः

२५

सन्निवृत्य तत आत्मनः कृतिं, दर्शयन्निव स वीर्यमात्मनः
तातमाह निटिले श्रमाम्बुभिः बिभ्रदच्छतममौक्तिकश्रियम्

२६

प्राह तं स च नृपः–'प्रियात्मज ! तोषितोऽस्मि तव वीरकर्मणा
किं ददानि वद पारितोषिकम्, हस्तिनं किमथवा तुरङ्गमम्'

२७

सोऽपि लज्जित इवाल्पवीक्षणः, हर्षधौत इव भास्वराकृतिः
कौतुकात् प्रतिवचोऽर्थिनः पितुः स्निग्धमङ्कमधिरूढ उक्तवान्

२८

'साम्प्रतं लघुकलेवरस्य मे किं गजेन, तुरगेण वा कृतम्
अन्ततस्तु वयसा भवत्समः श्रेष्ठमेव हि वृणोमि वाहनम्'

२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोदहेतुरपि तत् वचो हृदि प्राप्तमेव नृपमाकुलं व्यधात्
कर्णहार्यपि तथाक्षिहार्यपि सत्यथे मनसि न प्रियङ्करम्

३०

निष्ठुरेण समयेन दर्शिता, रोहितस्य वयसो निदेशिनी
सप्तमी जवनिका समामयी भैरवीव नृपसंमुखेऽभवत्

३१

रोहितस्य दुरदृष्टनाटके पूर्वरङ्ग इव चौलकर्मणि
संस्थिते वरुणमूर्तिरापयौ रूपिणीव चिरभीतिनर्तकी

३२

प्रार्थयत्यथ तदाऽपि भूपतौ यादसां पतिरुवाच तं स्मितैः
'बालकस्य नृप ! संस्कृतित्रयं संस्थितं, न विरता तवाऽर्थना !

३३

अस्तु तत्, न पुनरीदृशोऽर्थनाः सन्तु ते, व्रतदिने गते शिशोः
स्वां प्रतिश्रुतिमिमां न विस्मरेः, तिष्ठ संप्रति निवृत्तवान् अहम्

३४

इत्युदीर्य चलितेऽथ पाशिनि, सौधभूमिरहसत् सदुत्सवैः
हर्षगीतिमनिशं जगुः पजाः, शान्तिशीतल उवाह मारुतः

३५

तृतीयः सर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थः सर्गः

अद्य श्व इत्येव जगाम भूयान् कालः प्रजाक्षेमसुखेन राज्ञः;
को वा विलम्बः सुखवासराणां याने ? ऽविदित्वैव हि ते प्रयान्ति

१

आसीत् नृपः शान्तिमये प्रहर्षे प्रापत् पुनस्तापमये विषादे
सैषा स्थितिर्जीवनवाटिकायाः प्रफुल्लति, म्लायति पर्ययात् या

२

शून्ये क्वचित् निश्चितमद्य वा श्वः स्वजीवनालम्बनमेष्यतीति
निर्धारयन् एवमहो ! किमीय आत्मा न चिन्ताकवलीकृतः स्यात् !

३

काले व्रतार्हस्य नृपात्मजस्य जातं यथावत् व्रतबन्धकर्म
किन्तूत्सवोऽमन्यत तत्र लोकैः देहैः सभूषैः,' नतु मानसेन

४

बाष्पाकुले दीनदृशौ स्वपित्रोः वीक्ष्य, प्रजानां च सशोकमास्यम्'
किं वा कथं वेति स राजपुत्रः पृष्ट्वाऽप्यलब्धोत्तर आप चिन्ताम्

५

परं पुरा बालक इत्यनास्थैः जनैः कृता तं प्रति शोकशब्दाः
नत्यत्वमात्मीयमुदीरयन्त धीरं जुगुञ्जुः श्रुतिगह्वरेऽस्य

६

शुद्धान्तशून्ये समये विभीतः पप्रच्छ वात्सल्यमयीं प्रसूं सः
कि कश्चिदायास्यति मां जिघांसुः? मातर्मयाऽचर्यत कोऽपराधः!

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्सङ्गभूमौ विहरामि पित्रोः खादामि तत्स्नेहकरेण दत्तम्
न वेद्मि नामान्यपि सेवकानां, कस्याऽचरं मातरहोऽपराधम्!

८

स्वैरं स्वपित्रोः नयनस्थितोऽपि बालो वृथाऽन्येन निहन्यते चेत
तर्ह्यस्य कः स्यात् शरणाय मातः ? किं जीवनं तस्य वृथैव याति ?

९

किं वा क्वचित् दूरपलायितस्य क्षेमं भवेत् मे ? वद तत् करोमि
अहर्निशं रोदिषि किं; ममाऽपि हृदः क्षतं क्षारयितुं ततोऽपि

१०

निशम्य तत् साऽश्रुजलैः प्रसिक्ताः किंकृत्यवातेन निरुद्धचेष्टा
इतस्ततश्चाऽनिलघातरुद्धा प्रवर्षणस्थैव लता बभूव

११

क्रोडीकृतेऽस्मिन सविधेऽस्ति पाशो, पलायिते चाऽपि हता प्रतिज्ञा
किंकृत्यमूढाऽन्तरदह्यताऽसौ शोकात् इतो व्याघ्र इतस्तटीति

१२

क्षमार्थिनोऽन्यानपि निग्रहार्हान् जुगोप या शक्तिमयी सहस्रम्
साऽद्य स्वपुत्रं क्षमते न गोप्तुं शक्तिर्हि कालस्य न मानुषस्य !

१३

शोकाकुलायाःसहसा महिष्या अलीयतोच्छ्वास उदित्य शून्ये
हृत्स्पन्दनं ज्ञातमतिप्रमाणं देहोऽप्यवालोक्यत दारुभूतः

१४

स रोहितो मातरमासमुच्छ्रम् अशक्नुवन् द्रष्टुमिवाऽश्रिवाणैः
वेभिद्यमानो हृदि नष्टसंज्ञो बभ्राम सर्वा अपि सौधकक्षाः

१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वा दिशास्तस्य तम प्रलिप्ता बभुवु, रूक्षप्रचुरः समीरः
क्षणानि कल्पप्रतिमानि, विश्वं श्मशानवत् शून्यमशान्तिपूर्णम्

१६

शुभ्रांशुना येन समस्तमेव सौधाम्बरं प्राप महाप्रकाशम्
विपद्यमाने घनदुर्नियत्या तस्मिन्, ययौ तत् च महान्धकारम्

१७

अन्तःपुरस्याऽश्रुमयी समीक्षा नैराश्यसन्देशमदत्त तस्मै
अवर्धयत् मौनमसह्यमाधिम्, आश्वासनं मृत्युतटं निनाय

१८

विधौ विरुद्धे सति केन कोवा त्रायेत, तत् शक्तिमतोऽप्यचिन्त्यम
वराक आशाकरुणां तथापि दृष्टिं क्षिपत्यात्मजनेषु सास्रम्

१९

'सखे! पलायस्ववनं, त्वरस्व, कोणे निलीयस्व कुतोऽपि गत्वा
शृण्वन् विजानन्नपि किं मुमूर्षुः विलम्बसे याह्यधुनैव याहि

२०

उञ्छेन, भैक्ष्येण, मृगादिना वा निर्वर्त्स्यते वृत्तरसंशयेन
को जीवनं व्यर्थमहो जहाति! 'जीवन् नरो भद्रशतानि पश्येत्,

२१

एवं वयस्यस्य वचःप्रदीपात् निरस्य किंकृत्यतमा विविक्तो
प्रस्थातुकामोऽम्ब इवात्तदृष्टिः स्फुटं स्वयातव्यपथं ददर्श

२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रात्रिःकचानाम् अतिकालकालैः जालैः समाच्छाद्य दिशो, मुखेन
सर्वं धरालोकरसं पिबन्ती साक्षात् पिशाचीव पुरः समायात्

२३

ददर्श वा न 'साँसें' ति तमः प्रगाढम्, झिल्लीगणो झंकृतवान् अरण्यम्
दिवान्धयूथं कटु संरुराव, शिवागणोऽमङ्गलमाजुहाव

२४

'शोचेत् क एतां घटनां विलोक्य वृथे' ति मेघावरणच्छलेन
स कोमलात्मा विधुरश्रु शीतं संपातयन् व्योमगृहे निलीनः

२५

त्रासेन भ्रान्तोऽस्ति, शिराशिरासु घनीकरिष्यन्निव देहरक्तम्,
प्रकम्पयन्, कट्कटयंश्च दन्तान् ववाह वातो हिमशीतशीतः

२६

पुरा तथा कान्तिमतीम् अयोध्यां, क्षीणच्छविं वीक्ष्य तदोद्हार्यः
देवाङ्गना नो विविदुः कटिस्थं घटं स्थलात् संस्खलितं विषादात्

२७

स्वर्णस्य सोपानपरंपरासु 'गडत्गडत्' कारमधः पतन्तः
घटाश्च विस्फूर्जथुहेतुभूता अकम्पयन् द्यामवनीं च शश्वत्

२८

उद्धूय तासां मुखतः प्रगाढं विषादतामिस्रमुपर्यवन्त्याः
वितानभूतं घनभावमेत्य आवर्षयत् वारि घटैः विशिष्टैः

२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संघट्टनात् स्वर्मणिकुट्टिमेषु तेषां घटानां मणिनिर्मितानाम्
सुवर्णसूत्राकृतयः सहस्रम् विद्युत्प्रकाशा उदिताः क्षणाय

३०

स्थलेषु झर्झर्, सलिलेषु कल्कल्, वृक्षेषु छर्छर् पटलेषु बर्बर्
इति स्वनन्ती घननीरधारा पपात दन्तावलहस्तभीमा

३१

बालः क्व यातीति विषादनीला स्नेहार्द्रचित्ता सरयू अजस्रम्
तरङ्गकेशान् कुटिलान् किरन्ती पतन्त्यरोदीत् करुणं नदन्ती

३२

राजा निशीथे वरुणेन रोषात् सार्पेण पाशेन गले निबध्य
आकृष्यमाणं गलदश्रुधौतम् ददर्श पुत्रं दयनीयनेत्रम्

३३

स्नेहेन शोकेन च कृष्यमाणे मा मा वदत्येव नृपे प्रचेताः
आदाय बालं तरसा प्रतीचीम् ययौ; अभूत् तूर्णमतीन्द्रियश्च

३४

हा ! वत्स वत्सेति नृपेऽनुयातुं प्रवर्तमाने मणिभित्तिरेतम्
ललाटघातेन विशब्दमाख्यत् 'स्वप्नोऽय' मित्यार्ततरं निशीथे

३५

सार्धं प्रबोधेन यथा प्रशान्तिम् लेभे, तथा सौधगृहे जनानाम्
कोलाहलात् प्राप स दिष्टशापः सार्धं प्रशान्त्या महतीम् अशान्तिम्

३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हा! मे हृदो ज्योति! रिमाम् अभागाम् निमज्य यातोऽसि तमस्यगाधे
मा मुञ्च मां, दर्शय तं स्वमार्गं, विसृज्य सर्वं मुदिताऽनुयामि

३७

हा! वत्स मे प्राण! समेहि तूर्णं, क्व यासि विस्मृत्य मदीयमङ्कम्
पलद्वयायापि पलाय वापि मुखामृतं ते स्वदृशा पिबामि

३८

आलिङ्गितः प्रावरणै मया च पर्यङ्कतूलास्तरणेऽपि सुप्त्वा
आख्यासि शीतं; कथमद्य वाते तीक्ष्णासिधारे व्यथितः प्रयासि!

३९

विस्फोटयन्ती गिरिगण्डशैलान् वज्रोपलैः स्फूर्जथुमिश्च घोरैः
पषाऽस्ति वृष्टिः, स शिशुः क्व यातः, क आश्रयैस्तं विपदोऽभिरक्षेत्

४०

प्रकम्पयन्ती तटभूमिभागान् तरङ्गतुङ्गा सरयूः वहेत
यातः क्व मे प्राणशिशुः निशीथे; हा देव! किं विध्यसि मामभागाम्

४१

स्यात् पिच्छिलं वर्त्म नभोजलेन, ध्वान्ते कुतो गच्छति सूचिभेद्ये
दुरुत्तरे क्वाऽपि पतेत् स गर्ते, क उद्धरेत् तं सदयस्तदानीम्?

४२

दशेत भुजङ्गो विषदंष्ट्रया वा मार्गे क्वचित् तत्पदघातरुष्टः
भिषज्यति स्नेहहृदा क अङ्ग?, हा देव! कां कां विपदं स यायात्

४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं लपन्त्येव महिष्यकाण्डे हर्षात 'खिखि' स्कारमियं जहास
हासो हि फेनः, स जलात्मके वा विषात्मके वापि समस्ति सिन्धौ
४४

यतो यतः सा क्षिपति प्रहृष्टा कुतूहलाश्चर्यमयी स्वदृष्टिम्
ततस्ततः स्मेरमुखं ददर्श प्राणायितं पुत्रमभिन्नरूपम्
४५

देवी दिशासुपदिशासु, भूमौ, विहायसे, चोर्ध्वमधश्च पुत्रान्
ददर्श वात्सल्यकणान इव स्वान् बहिस्तदाकारतया प्रकीर्णान्
४६

स्वमात्मजं पश्यति यत्र यत्र साऽऽलिङ्गितुं धावति तत्र तत्र
अरुद्धहासा श्लथकेशपाशा विक्षिप्तचित्तेव तदा व्यलोकि
४७

सुकोमलात्मानमसत्यभीरुं यावत् नृपं सा घटना बबाधे
ततोऽप्यबाधिष्टतरां प्रतिज्ञा 'सन्तोषयेयं कथमम्बुदेवम्'
४८

सन्देश एष प्रससार वायौ सन्तापकक्ष्वेड इव क्षणेन
गतच्छविः शीतमयाश्रुदीना ऽयोध्या प्रभातोपतटे प्रबुध्दा
४९

भ्रान्त शुचः सान्द्रयतीव राज्ञो, हार्दं क्षतं क्षारयतीव भूयः
पाशी प्रहृष्यन् बहिरेव लब्ध्वा सन्देशगन्धं ह्य पभूपमायात्
५०

वीक्ष्यैव तं भूमिपतौ भयेन, त्रासेन, दैन्येन, महाह्रिया च
निर्म्रीकृते साञ्जलि बद्धकामे जगाद पाशी प्रथमं प्रहृष्टः
५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

'विभीतवत् नाटयसे मुखं च, पुत्रे गते हस्तिनिमीलिकां च
जानामि षड्यन्त्रमयोऽसि राजन् ! जलोदरग्रस्ततनुर्भव त्वम्'

५२

श्रुत्वैव सोऽन्तर्हितवान्; नरेशः स्मृत्वा भविष्यं सहसा चकम्पे
अमुञ्चदश्रूणि समीपवर्गः, सौधस्तदा मौनमिवाऽललम्बे

५३

चतुर्थ सर्गः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमः सर्गः

स्नेहेन नोदितो, राज्ञो व्याधिना च बलात्कृतः
मन्त्री राजसुतं यत्र तत्राऽन्वेषयितुं गतः

१

पाताले वा प्रविशतु, समुद्रे वाऽवगाहताम्
कोऽस्ति यो नाऽभिलक्ष्येत चरःसत्यमहोम्भनः

२

स ददर्श वने क्वाऽपि सान्द्रच्छाये तरोस्तले
शिलासने दीनमुखं विच्छायं राजनन्दनम्

३

शोकेनैव पीतरसं कृशं व्याक्षिप्तमूर्धजम्
धूलिधूसरितं कश्चित् अनाथमिव संस्थितम्

४

दृष्ट्वैव मन्त्रिणं बाल. स्पृष्टो भीत्या, ऽऽश्रयेण च
'बर्बरं' दृगम्बूनि मुमोच स्फुरिताधरः

५

शोकात् विवर्णरूपं तम् अनमित्यैव लक्षितम्
वीक्ष्यैवाऽश्रूणि संरोद्धुम् सोऽपि नापारयत् तदा

६

पितुर्निशम्य वृत्तान्तं राजपुत्र. शुचार्दितः
हृदि शूलैर्विद्ध इव विललाप तदन्तत

७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवृत्य स्वगुरोरर्थं दित्सन्तमपि जीवनम्
मंत्री तं वारयामास राजतंत्रविचक्षणः

८

प्रबोध्य कस्यचित् वृद्धब्राह्मणस्य समाश्रये
निभृतं बालकं न्यस्य स्वपुरं स न्यवर्तत

९

'वरं स्वामिकुलोच्छेदात् आत्मनोऽनृतभागिता'
इत्युक्त्वामतिराचख्यौ राज्ञे सूनोः अदर्शनम्

१०

न जाने क्व सुतो यातो भर्ता चास्ति महातुरः
किं विपद्दर्शनायैव राज्ञी सृष्टा जगत्सृजा !

११

शोकद्वयेन महता महिषी भर्तृपुत्रयोः
हिमवाताहता मृद्वी लतेव क्षीणतां गता

१२

राज्ञी तथैकं सुखदं लभते स्वाप्निकं क्षणम्
यदोत्सङ्गे भवेत् पुत्रो नृपतिश्च निरामयः

१३

इतश्च रोहितः स्वप्ने पितृभ्यां परिचुम्बितः
प्रातरुत्थाय धिक्कारैः आहते साश्रु मस्तकम्

१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसूहीनो व्याधभीतो मृगपोत इव श्वसन्
अशान्तात्मा बहून् निन्ये स वने शोकवासरान्

१५

स्वप्ने सौधस्थितिः, पित्रोः वात्सल्यं स्मृतितन्तुषु
न स्यातां यदि 'दीनात्मा स कथं नाम जीवति !

१६

प्रतिजज्ञे ऽविचार्यैव पिताऽस्मिन् विपदागता
'पित्रोः कर्म फलत्येव सत् असत् वापि सन्ततौ'

१७

'किं जीवनं, कथङ्कारं तच्च यायात् सम्मूल्यताम्'
इत्येव वनदृश्येषु निर्विण्णः स व्यचारयत्

१८

प्रकृतिश्च सुजिज्ञासुं तं वसन्तादिनामकैः
प्राबोधयत् जीवनस्य तत्वं षड्तुपुस्तकैः—

१९

'शीतवातातपा एते प्रकृतेः परिवृत्तयः
तथा सुखानि, दुःखानि धीरस्तान् न विचारयेत्

२०

क्लेशेनाऽपि परार्थाय धार्यं जीवनमात्मनः
निःस्वार्थता ऽमृतं लोके ऽमरभावाय तां श्रयेत्'

२१

एवं प्रकृतितोऽवाप्य संक्षिप्तं कर्मदर्शनम्
विविक्ते तरुमूले स स्वां स्थितिं पर्यचिन्तयत्

२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'को भवेत् शून्यहृदयः स्वार्थी वा मत्समो भुवि
यः स्वतातकृते :मांसपिण्डः स्वं न जिहासति

२३

अन्ते वार्धक्यहस्तेन, रोगहस्तेन वा ध्रुवम्
ग्रहीष्यत्येव मां मृत्युः, कैवाऽस्था क्षणजीविते !

२४

क्लेशयित्वा तु पितरं जीवन्नपि मृतोऽस्म्यहम्
वरं मृतोऽपि जीवामि तदर्थेऽर्पितजीवितः

२५

सतृषे जलसन्देशं कुर्वन् अन्यार्थजीवनः
कूपस्थः स वरं भेको; न नरः स्वार्थचिन्तनः

२६

परार्थकिरणः सूर्यः परार्थकिरणः शशी,
परार्थरत्नो जलधिः, परार्थफलिनो द्रुमाः !

२७

जीवनं स्वार्थघृणितं केषाम् अस्ति महात्मनाम् !
धन्यास्ते ममतापाशात ये विमुच्य सुनिर्वृताः

२८

रक्षणेऽस्य शरीरस्य कियत् दुःखं, कियत् भयम्
परार्पणे कियत् सौख्यम्, कियती कृतकृत्यता !

२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो रहस्यमये विश्वे दत्तवान् मम जीवनम्
तदर्थे तददाने स्यात् कियती मे कृतघ्नता !

३०

पितृनाशे कथं जीवेत् माता मे भर्तृ जीवना
जीवितेन मया कोऽर्थः ? पितरौ एव निघ्नता !

३१

गर्भदुःखानि निर्वेश्य मया सा यदि दुःखिता
तर्ह्यहं नृकुले जात ऊर्णनाभोऽश्वकोऽपि वा !

३२

स्वार्थे मे चेष्टमानस्य कियत् संकुचितं मनः
परार्थे ध्यायतोऽप्यद्य कियत् विकसितं पुनः

३३

तत् अद्यैव गृहं गत्वा स्वीयेन जीवनाम्भसा
तातस्य रोगज्वलनम् आशु निर्वापयाम्यहम्

३४

एवं विविच्य विपिनात् प्रस्थितेऽस्मिन् गृहंप्रति
शतमन्युस्तस्य मार्गे मूर्तो विघ्न इवाऽगमत्

३५

पन्थानम् अवरुध्यैव तमिन्द्रः प्राह सस्मितम्
'अविविच्य परं वत्स ! तत्र कोऽयम् उपक्रमः

३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत्स ! ज्ञानेन येन त्वम् एवं प्रस्थितवान् असि
न तत् ज्ञानं भवेत्, तत्तु ज्ञानाभासो मतो मम

३८

'परार्थता जीवनस्य फलम्' इत्यसती मतिः
केनाऽहो दुरदृष्टेन हृदि ते कोमलेऽङ्किता ?

३९

वद, त्वयैव विश्वस्तौ सूर्याचन्द्रमसौ यदि
परार्थौ, किं नार्पयतः राहवे स्वस्य जीवनम् ?

४०

यावत्सृष्टौ जीवनस्य नैवोद्देश्यं परार्थता
सा तु जीवनलक्षेषु संभवत्यनुषङ्गतः

४१

परिणामादिना शीर्णाः हस्तपादादयो नृणाम्
गृध्राद्यर्था यथा, तद्वत् प्रसवा अपि शाखिनाम्

४२

परार्था यदि वृक्षाः स्युः, मार्गे संकष्टहेतवः
उत्पद्यन्ते कण्टकिनः छिन्ना अपि कथं पुनः

४३

रत्नाकरः परार्थश्चेत् कोषे ह्यावर्तदुर्गमे
किं संचिनोति रत्नानि ?, कोवाऽर्थो ग्राहरक्षिणाम् ?

४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्येत् स कथमन्यार्थो दीनान् रत्नप्रवञ्चितान्
जिघृक्षन् अपि रत्नानि किं निमज्यैव मारयेत् ?

४५

यथाऽनुषङ्गात् रत्नाप्तिः तस्मात् स्वार्थपरात् अपि
तथाऽन्यस्मात् प्राप्तिरपि वाहगेवाऽनुषङ्गिको

४६

ईदृशोऽपि परार्थाः स्युर्यदि, नष्टधनादिकाः
नरा अपि परार्थाः स्युः चौरादीनां प्रपूरणात्

४७

जीवनस्य परं लक्ष्यम् ऋते स्वार्थप्रपूरणात् !
नास्ति, वत्स ! प्रवर्तस्व तस्मात् स्वार्थाय जागृतः

४८

वत्स ! जीवननिर्माणे स्वार्थः तत्वं, परा कला
पृथ्वीं च त्रिदिवीकर्तुं मंत्र एष महान् मतः

४९

परार्थतैव शास्त्रादौ श्रेयसी चेत् निरूपिता
वृद्धोऽपि ज्ञातशास्त्रोऽपि पिता त्वां किं जिघांसति ?

५०

परार्थत्वं परेशस्य संमतं चेत्, कथं नराः
परार्थाः तेन योज्यन्ते ? दुःखैः स्वार्थपराः सुखैः

५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात् स्वार्थाग्रतः सन्ति न पिता, न च बान्धवाः
स्वार्थो जीवनवृक्षस्य मूलं, तत् रक्ष सर्वतः

५२

त्यक्त्वा सद्यःफलं स्वार्थं परार्थत्वनिषेवणम्
प्राप्तं कपोतमुत्सृज्य श्वो मयूराभिकाङ्क्षणम्

५३

मुमूर्षसे किं मन्दात्मन् ! पारेजीवनमस्ति किम् ?
इह भोगाः सन्ति, तत्र तदीयाः स्मृतयो घनाः

५४

मृत्वा किं कुरुषे, तातं तमेकं जीवयिष्यसि,
जीवित्वा तु परोलक्षान् जीवयिष्यसि नित्यशः

५५

निश्चिन्तं तिष्ठ, ते तातो गतिं यातु स्वकर्मणः
त्वयेदानीं जीवितोऽपि सोऽन्ते किं न विपत्स्यते ?

५६

जीवयित्वा तातमेकं स्ववंशं छेतुमिच्छसि ?
बहुना किं, वत्स ! जीव 'जीवन् भद्राणि पश्यति'

५७

सवितण्डं वचः श्रुत्वा शकस्यैतत् स बालकः
तत् तथैवेति सन्धार्य स्वस्थानं संन्यवर्तत

५८

पञ्चमः सर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठः सर्गः

भूपश्च रोगेण बलात् गृहीतो मृत्योः करेणेव सुदारुणेन
बद्धाञ्जलिः प्राह तपस्विराजम् अमेयशक्तिं स्वगुरुं वशिष्ठम्

(१)

'स्वयं विषण्णोऽस्मि रुजाऽनयाऽहं, मजीवना सा महिषी, प्रजाश्च
आख्याहि तत् सर्वविपत्तिमूलम् एषा निरस्येत कथं समूलम्

(२)

नो चेत् त्वमेवाऽदिश मुक्तये मां येनाऽत्महत्याकलुषात् प्रमुच्ये
अस्मात् च मृत्योःपरुषात् स्वरोगात्, 'सद्यःस मृत्युः न चिराय कष्टम्

(३)

न चित्तशान्ति, र्न च देहशान्तिः, न देशकार्यम्, न समाजकार्यम्
जीवामि भस्त्राश्वसितो विधातः तिष्ठामि डित्थस्थितिरर्थशून्यः

(४)

पुण्योपलब्धा मम कर्मभूमिः एषाऽभवत् संप्रति शोकभूमिः
सम्राहसस्यापि कृषीवलस्य शक्त्या विहीनस्य यथोर्वरा भूः

(५)

कामं प्रजाः सन्ततिनिर्विशेषाः भक्त्यैव मे सर्वमुपाहरेयुः
तथापि सेवाऽक्षम एष आत्मा तत्स्वेदभारं क्षमते न वोढुम्

(६)

अवेक्षणायैव गुरो ! प्रजानां राज्यासनं मे, न तनोर्निजस्य
शुश्रूषितुं रोगिणमेव देहं नेच्छामि राज्यं, प्रकृतीः प्रतार्य

(७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरो विपाकस्य तु नाधिकारी, भवेदसौ कर्मण एव भूम्नः
अकर्मणः किं मम जीवनेन ?, चेत् ईशभावेन जगत् न सेवे

८

वरं म्रिये संप्रति, सत्यदेवं प्रयाच्य कर्मक्षममन्यदेहम्
इहैव पुण्ये सरयूपकण्ठे स्मरन् प्रजा एव पुनर्निवर्ते

९

सूर्यः, शशी, वात, इमे नदाश्च कुर्वन्ति कर्माणि जगद्धिताय
अकर्म किं जीवनमस्ति धार्यम् ? 'कर्मैव स यस्य परो निदेशः'

१०

कर्मैव सद्योनि, मदस्यसत्त्वं, सद्भावनां, ज्ञान, ममर्त्यतां च
ददाति तदृश्चित एष देहो जिजीविषेत् किं वितथं भराय ?

११

न कर्मशून्यो मनसा स्वभव्यं भिक्षाम्यहं सृष्टिनृपं परेशम्
स्वार्थी प्रजानां कुशलेष्वनास्थ ललाटदर्शीव नृपोपसेवी

१२

अहं तु तस्यैव विराज एक संरक्षको बाहुरनर्थजातेः
संरक्ष्य पृथ्वीं, स्वमुदात्तकर्म समर्प्य, तं प्रीणयितुं समीहे'

१३

निशम्य राज्ञो, वचनं वशिष्ठो भविष्यदृष्टिः समुवाच भूयः
मदुक्तमङ्गीकुरुषे यदि त्वम् अद्याप्यहं वच्मि तदेव भूयः ?

१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'एकं विनाश्यापि हि देशनाभिः कल्मषोपकारो नृपतिः स रक्ष्यः'
इति प्रजानां परिषत् त्वदर्थे सहस्रवाचान् इव निर्णिनाय

१५

तत् सम्मतं, लोकमतं च राजन् ! लोकस्य भूत्यै न तिरस्कुरुष्व
एकः शिशुर्गच्छतु, नैव शोच, भूयात् अविघ्ना तव विश्वसेवा

२६

यस्यैव शापेन रुजं गतोऽसि, तं क्रीतपुत्रेण यजस्व भूप !
दशप्रकारेषु सुतेषु शास्त्रे क्रीतोऽपि तेष्वेकतमः स्मृतोऽस्ति

१७

चेत् नैवमङ्गीकुरुषे, प्रतिज्ञा हता, हतं सत्यमथ स्वयं च
हतः, प्रजाश्चाऽपि हता, त्वया स याज्यः शिशू रक्षित एक एव

१८

'अल्पस्य हेतोर्बहु हातुमिच्छा' सत्यं न शुक्रे त्युदयद्विचारम्
आकारमुत्प्रेक्ष्य नराधिपस्य भूयो नृपं प्राह स संयमीन्द्रः

१९

किन्त्वद्य याताऽस्मि दिवं मघोनः सन्देशतः, श्वश्च ततो निवृत्य
यागाय सज्जास्म्यधुना तु न स्यात् शुक्रास्तभावात् अपि सन्मुहूर्तम्

२०

× × ×

ज्ञाने, बले, संपदि, सभ्यतायां भोगे, नये चापि विकासस्यूर्यम्
स्वर्गं मुनिः प्राप, सुराङ्गनानां गीतानि तद्द्वारत एव शृण्वन्

२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"रुनु झुनु रुनु झुन्......
अल्पसुकर्मन् भृङ्ग! यियासो! पुष्पसुखस्थं मे मधु पीत्वा
त्वं भुवि चान्यं भृङ्गमजस्रं म्लानसुमस्थं वर्णय गत्वा!
रुनु झुनु रुनु झुन्....
नृत्यगिदं मे नन्दनवाते चञ्चलमध्यं हावसुरम्यम्
मर्मरगीतं पल्लवहस्तत्यञ्जकरम्यं वर्णय गत्वा!
रुनु झुनु रुनु झुन्......
स्वर्णमृगाणां निर्भयकेलीमञ्जुलमानन्दैकनिधानम्
नन्दनहर्म्यं मे मणिधारानिर्झररम्यं वर्णय गत्वा!
रुनु झुनु रुनु झुन्......
स्वर्झरिणीवाते कणशीते सौरभधौते स्वर्णप्रदोषे
प्रेमिणि चूते मे प्रणयस्याऽमन्त्रणमेतत् वर्णय गत्वा!
रुनु झुनु रुनु झुन्....

वीक्ष्यैव तं मानेधनं शमीन्द्रं स्वरङ्गनानां प्रशशाम केली
काश्चित् व्यलीयन्त भियेव कुञ्जे काश्चित् व्रतत्यन्तरिता बभूवुः

२२

सत्याय, देशाय, जनाय चापि रणे मृतानाम अमरत्वभाजाम्
ज्योतिर्मयी मूर्तितती: प्रपश्यन् माणिक्यवीथ्या स ययौ सुधर्माम्

२३

प्राप्तं सभाद्वारि महर्षिमुख्यं सभासदां स्वागतवाङ्मिषेण
मन्ये सुधर्मैव मुदोच्चशब्दा तं स्वागतं स्वागतमित्यवोचत्

२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'कः सत्यसन्धोऽस्ति नरः पृथिव्यां' प्रश्नोऽयमिन्द्रस्य न पूर्ण आसीत्
स एव भूयः सकुतूहलं तैः अकारि सभ्यै'र्मुनिपुङ्गवेऽपि

२५

कोऽवर्णयत् संसदि मुक्तकण्ठं-'सत्यप्रियोऽखण्डितसत्यनिष्ठः
मर्त्यो हरिश्चन्द्रसमः पृथिव्यां नाऽभूत् पुरा, नाऽद्य च कोऽपिदृष्टः,

२६

निशम्य तत् साध्वपि कौशिकस्तु नैवाऽनुमेने वचनं तदीयम्
'सेर्ष्यो हि साध्वीमपि पूर्ववैरात् संमन्यते नैव विपक्षवाचम्

२७

स सावहित्थं कृतकस्मितेन गाम्भीर्यमन्दं स्फुरताऽधरेण
निम्नीकरिष्यन्निव मौनिराजम् आक्षेपगर्भैः अवदत् वचोभिः

२८

'नाऽभूत् पुरा, नाऽद्य च कोऽपिदृष्ट' एवं तु नैवोचितमस्ति वक्तुम्
भागेष्वनन्तेषु भुवो महत्याः, विधातक ईदृक् मनुजोऽस्ति नोवा ?

२९

वीरोऽस्ति, विज्ञोऽस्ति, जनप्रियोऽस्ति परं स सत्योऽस्ति नवानविघ्नः
आशामुखेभ्यो वितरेत् द्विजेभ्यः, न तावता सत्यमयो भवेत् सः

३०

पृथ्वीतले केचन सन्ति विप्रा आदर्शशून्या उदरस्य भक्ताः
ये ज्ञातशास्त्रा अपि पिण्डदातृ न स्तोतुं त्रपन्ते न मृषाप्रलापैः

३१

किं तादृशामेव वचांसि शृण्वन् एवं महात्माऽपि भवान् ब्रवीति
किं वा स सत्यव्रत एव नो चेत् महोदरः स्यात् कथमद्य शापात्'!

३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशम्य गाधेः तनयस्य वाचं वसिष्ठ ईषत् स्मयमान आह
'किं भो ! वृथा निन्दसि सत्यभक्तम्, वदामि गर्वेण 'स सत्य एव'

३३

अलब्धपिण्डैः अवधीरितोऽपि, प्रलब्धपिण्डैः अतिसंस्तुतोऽपि
नाऽन्यो भवेत् सत्यधनो महीपः, परं स निष्पक्षदृशा विलोक्यः

३४

एवं ब्रुवाणेऽथ मुनौ वसिष्ठे, पुरन्दरः प्रस्तुतवान् ततोऽन्यत्
स कौशिकः प्रस्फुरिताधरोऽपि किञ्चित् पिधित्सन्निव मौनमास्त

३५

× × ×

ददाति राजा द्रविणं, तदर्थे विकेष्यते को नु सुतं स्वमेवम्
जुघोष तारं नृपडिण्डिमोऽपि गृहे गृहे, संवसथे पुरे च

३६

कश्चित् द्विजो लोभवशात् नृपाय नाम्ना शुनःशेफ मदत्त पुत्रम्
समाजगापात हि पशोः अवस्थां प्राप्नोत्यगत्या वत ! मानवोऽपि

३७

ततः प्रवृत्ते नरमेधयज्ञे स यूपबद्धो बटुकोऽतिदीनः
रुरोद तारं करुणं च,हन्त! स्वजीविते कस्य नु न स्पृहा स्यात् !

३८

तत क्रन्दितं, तत मुखमश्रुधौतम्, नेत्रे च ते तस्य निराशदीने
नाऽपारयन् वीक्षितुमृत्विजोऽपि, कस्याऽस्त्यहो तत्र हृदयं शिलायाः

३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्येमखं गाधिसुतो दयार्द्रो हस्तस्य खड्गेन दयान्लथेन
पशूकृतं विप्रसुतं सुदीनम् आलप्स्यमानं जनमित्यवोचत्

४०

'शामित्र ! भो ! मा जहि मा जहीमं, यदृच्छया गच्छतु मुञ्च मुञ्च
लब्धा नृपो यज्ञफलं ममैव गिरा, बटुं संप्रति मुञ्च मुञ्च

४१

तथा हतं बालमहो ! समक्षे को नाम रक्षोहृदयोऽभिपश्येत्
न लोचने काचमये, न लौहं चित्तं, नवा प्रेतकुले जनिर्नः

४२

सृष्टौ मनुष्योऽपि मनुष्यमेव निहन्ति चेत् हन्त ! विनापराधम्
किं राक्षसाः तर्हि भवन्ति गर्ह्या वृथा किमत्याचरितं वराकैः !

४३

यद्यात्मभावेन समस्तजन्तून् नो वीक्षते, नो दयते मनुष्य
किं वा फलं तस्य मनुष्यतायाः ? वरं स घासं चरतात् वनस्थः

४४

त्वदुद्यतं खड्गमिमं निरीक्ष्य सत्यं निराशाकरुणोऽस्ति बालः
शामित्र ! तत् मा जहि मा जहीमं, यदृच्छया गच्छतु मुञ्च मुञ्च

४५

निशम्य तत् भूपतिरक्षियुग्मं विस्फार्य, संकोच्य ललाटरेखा
किञ्चित् कषायेण मुखेन गाधेः सूनुं प्रबद्धाञ्जलिरेवमाह

४६

मा मा वदत्येव मयि प्रजानां, भवादृशानां विदुषां च वाग्मः
यज्ञं सफलकल्पतया प्रवृत्तं बलेर्विरोधेन कथं विहंसि ?

४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षस्य सिद्धौ अपि मध्य एव कर्मोपरोधे विहता श्रुति: स्यात्:
संकल्पनाशो मम सत्यमेयात्: तोष्यश्च भूयो द्विगुणं प्रकुप्येत् !

४७

तत्रैव दोषाय वहामि यागं, वटुः पशूकृत्य हि यात्य एव
स्थितेः प्रबुद्धस्य मतं ममेदं, कामं भवान् कुप्यतु मोदतां वा'

४८

सत्यात् विभीतस्य नृपस्य वाचा भूयोऽतिदीनं वटुकं निरीक्ष्य
स गौरवात्मा मुनिराह भूयः प्रसान्त्वयन् अस्य समीपमेत्य

४९

'मा गा वटो ! भीतिममेयशक्तिः तपःप्रभावात् गतपूज्यपङ्क्तिः
अन्यायतामिस्ररविः प्रचण्डः स कौशिकः संप्रति ते पुरोऽस्ति'

५०

स सोमयाजी ह्यपमृत्युमुक्त्यै तस्मै दयार्द्रोऽदित पाशिमन्त्रम्
यथा ऽष्टमूर्तिः भवबन्धमुक्त्यै मुमूर्षवे यच्छति राममन्त्रम्

५१

जजाप बालो ऽपि सभक्ति मन्त्रम्, तां तर्कशून्यां वटुकस्य भक्तिम्
द्रढीयसीं वीक्ष्य स हृष्टचेताः पाशी पुरः प्रादुरभूत् क्षणेन

५२

उवाच पाशी वटुकं स्मितेन 'मा गा भयं वत्स ! दयामुखोऽसि,
यागोऽस्तु पूर्णो वचसा ममैव, भूयात् नृपालश्च रुजा विमुक्तः

५३

त्राणेन बालः प्रससाद, भूपः आरोग्यतः, सोऽपि मुनिः स्वगर्वात्
ववातनं पाशिवचः प्रभाते ज्योतिर्यथा सर्वगतं तमोऽह्नम्

५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदैव चातुर्यचणैः स्वचारैः अपायशून्ये समये सुभव्ये
आनीतमात्मीयसुतं नृपोऽपि बहिर्गतं प्राणमिवाऽभ्यगच्छत

५५

स्नेहस्नुता सा महिषी च नष्टलब्धार्भका गौरिव हर्षपूर्णा
हर्षाश्रुपूरैः स्नपयन्त्यजस्रं जघ्रौ स्ववत्सस्य शिरो, मुखं च

५६

कुमार आयात्! हृदयं समायात्! देवोऽनुकूलः ! फलिता स्पृहेति
कोलाहलो हर्षमयो जनानां सौधातिगो व्योमतले मुमूर्च्छ

५७

तदा सदारेण महीश्वरेण शुभ्रा दिशः, शान्तिमयः समीरः
स्वच्छं मनः, शर्ममयी तनुश्च दुर्दैवहासात् इव सर्वमाप्तम्

५८

गाधेः सुतं प्राह नृपो विनम्रम्-ःमुनेऽर्पयेयम् मखदक्षिणां काम् ?
अक्लेशयं स्वार्थकृते भवन्तं, यत् काम्यते तत् क्रियतां, ददामि

५९

अनादृतंमन्य उदग्रभावः सत्यं बुभुत्सुश्च स आह भूपम्
याचे किमन्यत् नृप ! मे प्रयच्छ राज्यं ससर्वस्वमिं निजस्य

६०

श्रुत्वा गिरं तस्य समीपवर्गः दध्यौ सशोकं च सविस्मयं च
'विक्षिप्तचित्तोऽभवदेष किं ; यत् अयाच्यमप्यर्थयते बुधोऽपि,

६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परं सत्यो नृपतिस्तथेति मुनेः परीक्षाकुतुकेक्षणस्य
पदद्वये हृष्टमना सभक्ति राज्यं ससर्वस्वमुपाहरत् सः

६२

स्वयं तु राजेन्दुरनन्यदीप्तिरेवाऽभवत राज्यकलाक्षयेऽपि
परं पुरावत् प्रकृतिं समस्ताम् हर्षत्विषा भासयितुं न शेके

६३

गमिष्यतः शोकनिशां प्रगाढां साकेतलोकस्य विधेर्हतस्य
धीरं शुभालोकमपाहरन्ती सद्योऽभवत् सा घटनैव सन्ध्या

६४

प्रतिग्रहात् अर्जितशासनोऽसौ मुनिर्नृपं प्राह वशंवदं तम्
'किं दक्षिणां स्वर्णमयीम् अदत्त्वा पूर्णं भवेत् दानमिदं नृपाल !'

६५

ततो नृपालस्य ललाटभूमिः स्विन्ना, मुखं प्राप कषायभावम्
नैरव्यमापत् रसना क्षणं तु रुद्धं गले वाक्यमपि प्रसह्य

६६

भूयोऽपि तं प्राह मुनिः सदर्पं-- किं मौनमुद्रां श्रयसे शिलावत् !
मैवं विलम्बस्व नृप ! प्रयच्छ मदक्षिणां, वा त्यज सत्यमेव '

६७

अहो ! किमेतत् विधुरं समायात ' इत्यश्रु मुञ्चत्यवरोधवर्गे
राजाऽपराधीव विनम्रमूर्धा कृताञ्जलिः कौशिकमेवमाह—

६८

सत्यं जिहासुर्न भजामि मौनं भजाम्यहं प्रत्युत रक्षितुं तत्
मा याहि रोषं चरणप्रपन्ने, निर्यातयिष्याम्यचिरेण देयम्

६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भार्यादि देहत्रितयं ममाऽस्ति धनं तदन्यत् भवते प्रदत्तम्
वेत्स्येव मर्मज्ञ ! कियन्त्यहानि द्यस्व मह्यं द्रविणार्जनाय

७०

छित्वा शिरो, जीवितमेव दातुं शक्नोमि, भार्यातनयौ च निघ्नौ
मुने ! तदन्यं तु कथं कुतो वा शक्नोमि सद्यो वितरीतुमर्थम्

७१

वाराणसीं यामि मुनीन्द्र ! पूर्वं संकल्प्य ते दत्तचरे प्रदेशे
पापाय किं नाथ ! वसानि ? सा तु शैवी पुरी सर्वसमा श्रुता मे

७२

गत्वा मुने ! तत्र पितुः शिवस्य, मातुश्च तस्याः सुरनिर्झरिण्याः
सत्याशिषा लब्धधनस्य किं मे सत्यव्रतं नो परिरक्षितं स्यात् ?

७३

षष्ठः सर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमः सर्गः

अथ भूपतिरेष सात्मजः सकलत्रो निरगात् स्वहर्म्यतः
अवरोधजनस्य साश्रुभिः करुणैःक्रन्दितनिःस्वनैः सह

१

सुविभृत्य निजेच्छयोज्झितं निजसौधं विनिवर्तितेक्षणः
नृपतिः सधृति व्यलोकयत् असकृत् जीव इव स्वविग्रहम्

२

दयितान् स्वजनान् विलोकयन्नपि साश्रून् पुरतः स भूपतिः
करुणाविधुरः शशाक नो लपितुं रुद्धरवो गलेऽश्रुभिः

३

कथमप्यवलम्ब्य धीरतां स नतः साञ्जलिराह कौशिकम्
'भगवन् ! मम ता इमा प्रजा इत पश्यन्ति भवत्समाश्रये

४

सरलाः करुणाश्च मे प्रजाः परिवृत्तो सहसा नियामके
नवभूपपथात् क्वचित् च्युता अपि रथ्या इव यान्तु ते क्षमाम्

५

न मनागपि दुःखिताऽइमा जहतं माऽभिशपन्तु निष्ठुरम्
पर-शापशिलां गले दधत् न तरिष्यामि भवाब्धिमन्यथा

६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न नृपात् इतरस्य कस्यचित् अपि विश्वस्य सुसेवनात्मकम्
विधिनैव सुभाग्यमर्पितम्, सुनयैः वत् परिरक्ष्यताम् इतः

७

दिनकृत्कुलजैः नृपैः इयम् सुतवत् लालितपोषिताः प्रजा;
पुनरप्यवलोकयतां त्वया सुतदृष्ट्यैव, नतु प्रजादृशा

८

प्रविवत्सुरिवाऽत्मसन्ततिं दयितां स्नेहमयीं स्वकां प्रजाम्
हृदये त्वयि निक्षिपाम्यहम्, इयमात्मीयतयैव रक्ष्यताम्

९

इति सप्रणयं वदन्नसौ हृदि केनाऽपि शितेन शङ्कुना
अभिविद्ध इव श्वसन् पुनर्विरतो मध्यत एव सत्वथः

१०

'विफलं गतशासनं वच' इति पर्यन्तभुवः स्वसद्मनः
चलितोऽभिददर्श स प्रजा अवरुध्यैव पथः पुरःस्थिता

११

प्रकृतेः, नृपतेश्च, दर्शनं सहसंकल्पमभूत द्वयोर्मिथः,
अवरुद्धमथो वचस्तयोः, विततं साश्रु मिथो विलोकनम्

१२

प्रकृतिः क्षणमौनमुद्रया प्रतिबोध्येव सुषुप्सधृक्ऽटताम्
दयितेव निजप्रियं सदा प्रविवत्सुं नृपमाह विह्वला—

१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरणप्रणतान् विहाय नो न भवान् संप्रति गन्तुमर्हति
हृदयी करुणान् स्वमाश्रितान् न कदाचित् विरहय्य गच्छति

१४

त्वयि गच्छति नाथ ! वञ्चितान् ननु कोऽस्मान् विपदोऽभिरक्षति ?
स्खलितान् अपि कश्च मृष्यति, सुतवत् स्निह्यति, तात ! पुष्यति ?

१५

ननु ! केयमपूर्वपद्धतिः चरणैः धर्ममयैः उपाश्रिता
यत एवमनाथिता मही, प्रकृतिश्चाऽपि शुचाऽकुलीकृता ?

१६

कथमेक-ऋषेः विशोषयेत् हसितं लक्षजनाश्रु सन्ततम् ?
नृप ! यद्न्यपदेशतो निजं कृतकृत्यं मनुषे बुधोऽपि सन्

१७

यदि न प्रतिपद्यसे वचः प्रणतानां नृप ! नः सुचेतसाम्
वयमप्यभयाः कियत् क्षमाः वदितुं, सत्ययुगोऽस्ति सांप्रतम्

१८

'बहु बान्तमितो विरम्यताम्' इति साऽमर्षतयैव कौशिके
वदति प्रकृतिः स्वविस्मृता समवोचत् दहतीव तं रुषा

१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'न भवान् विषयोऽत्र नो गिरां, नच लभ्योऽत्र पुनः प्रतिग्रहः
किमकाण्डगिराऽनया मुने ! त्वरितं प्रत्यपगम्यताम् इतः

२०

भजितैः मुनिवेषमादधत् त्वमशान्त्यै त्वरसे जगद्गने
छद्मैः तरुवेषमादधत् मृगजीवीव दुराशयं वहन्

२१

असकृत् जगतः प्रतारणात् परिपक्वां मधुपिङ्गलां तताम्
अशमः शिरसैव केवलं वह मायाव्रततिं जटामिमाम्

२२

न तनौ तव तापस महः स्फुरति स्नेहनयेन शीतलम्
प्रदहन् खलु राज्यकाननं ज्वलति प्रौढशिखामयो ऽनलः

२३

तपसा ऽनिलपर्णवृत्तिना, वनवातैः शिशिरैश्च चन्दनैः
अपि पुण्यवपुर्निसर्गतः फणिवत् क्रोधहलां वमसि

२४

मुनियक्ष ! तृषाऽस्ति चेत् तव, पिब नः शोणितमेव, ज्ञायताम्
तव तन्त्रमिदं च शासनम्, परमस्मात् न निरेति नः प्रभुः,

२५

अथ मध्यत एव भूमिपः प्रतिषिध्योद्धत भाषिणीं प्रजाम्
करुणामय आह- 'भो ! क्षणं मम सत्य वचनं निशम्यताम्

२६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदुषा स्थिरसूतिमिच्छता न विनिःश्वाः परमात्मभूतयः
सकला अपि जीवतन्तवः, सुतरां संयमिनो द्विजातयः

२८

जगतः कुत आगता वयं, कुत एतव्यमितोऽन्ततश्च नः
क्षणभङ्गिनि विश्वमन्दिरे सहवासोऽत्र भवेत् कियत्क्षणः ?

२९

न पुरा कलहो, नचाऽन्ततः, किमु मध्ये लघवे क्षणाय सः
क्रियते ?, हसितेन वासराः अतिवाह्या हसितान् च पश्यता

३०

त्रिदिवे द्युषदां यथाऽमृतम्, इह मर्त्येऽपि मिथः सबन्धुषु
प्रणयामृतमस्ति निर्मलम्, नय तेनैव दिनानि निर्वृतः

३१

जगतः परिणामदेशना अतिमर्त्या मुनयो बिधेर्भुजाः
उपरि प्रभवन्ति नः सदा; तदिमान् भावय देवभावतः

३२

प्रकृतेः नियमेन जातुचित् भवितव्ये विरहे ध्रुवं मम
विधिना त्वधुनैव कल्पितः सहनीयः स सुधीरचेतसा

३३

तदलं रुदितेन, गच्छत स्वगृहान्, भावनया विशुद्धया
क्रियया समतानिबद्धया प्रयतध्वं जगतो ऽस्य शर्मणे

३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विजहीत स्मृतीं प्रयामि, वः कुशलं दूरगतोऽपि चिन्तये
दयया क्षमनीयमेव मे कृतमुच्चावचमस्ति चेत् कचित्

३५

सुकृतं यदि वा कियत् भवेत् भवतां सेवनकालसातृषाम्
अपनेतुमथ पुनर्जनिम् अधिसाकेततटे ग्रहीष्यति

३६

विमलं मयि हार्दमस्ति चेत् हसितेनैव मुखेन तिष्ठत
रुदितान् व उपेक्ष्य गच्छतो मम किं वर्त्मनि मङ्गलं भवेत्

३७

जननं, मरणं, प्रियस्य वा विरहः शल्यमयो न चेत् भवेत्
बहु किं त्रिदिवेऽपि संसृतेः, यत एतां सुकृती जिहासति

३८

दयिता मम हे हयाः! गजाः! बिहगाः! हे सवृषाश्च धेनवः!
वसत, व्रजितोऽस्म्यहं, विधिः सकलान् क्षेमवतः करोतु वः'

३९

इति भूपतिना समीरिता प्रकृतिः क्लिन्नतनुः दृगम्बुभिः
व्यसृजत् नृपतिं, यथोषसः तुहिनैः आर्द्रतनुर्लता मधुम्

४०

अवनीतलमुत्खनन्निव, दृढमुत्क्षिप्य दिवं नयन्निव
पथि धूलिभिरन्धयन्निव पथिकानां भयचञ्चला हयाः-

४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथयन्निव हृद्विदारिणीं करुणां भूपकथां दिवौकसः
नृपवर्त्मनि वात उद्ववौ तरसाऽवर्तमयो भयावहः

४२

तरसा गलदाम वैतसमपि संत्रोट्य, विलङ्घ्य गोष्ठकम्
फणिभोगवदेव लम्बितं चलमुन्नीय च पुच्छनालकम्

४३

दशदिक्षु शुचाऽश्रुसङ्कुले भयलोले करुणे दृशौ वहन्
त्वरयाऽगमदुत्पतन्नृपम् अनु 'बाँ बे' ति रुवन् गवां गणः

४४

गतवत्यथ देवतल्लजे किमु शून्यैः पुरमन्दिरैरिति
कुपिता इव शोणदृष्टयो वृषभा उत्ककुदः सफूत्कृति

४५

मद 'होंक्' कृतिभीषणा मही भृशमुद्धृत्य खुराग्रहन्तिभिः
निशितैः असकृत् व्यदारयन् निजशृङ्गैः पुरमन्दिराण्यपि

४६

तुरगा अपि भग्नमन्दुरा व्यथयन्तः कटुरेषणैः श्रुतीः
अयताः चलकेशरा; जनान् पुर उन्मत्तगतैः व्यभीषयन्

४७

उपसौधमवस्थितस्तदा न कपोतः सविधे स्थितां प्रियाम्
परिचुम्बति, नाऽपि सन्निधौ क्षुधितौ स्वौ पृथुकौ च पश्यति

४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विमना इव पक्षतिद्वयम् अभिसंकोच्य, निमील्य लोचने
मलिनो विरहग्रहादिव व्यथितः तिष्ठति शोकमुद्रया

४९

× × ×

नाकर्ण्यते प्राक् इव सौधभूमौ प्रभातगीतं श्रुतिहारि शोकात्
सुप्तानि तूर्याणि हि मागधानां हस्तेषु, तूयष्वपि गीतशब्दाः

५०

नवा प्रबुध्याऽपि सुवर्णरश्मेः सङ्गात् विहङ्गा उपसौधभूमौ
पुरेव धान्यादिकणान् चरन्ति, क्रीडन्ति, नृत्यन्ति, कलं रुवन्ति

५१

सप्तमः सर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमः सर्गः

पूर्वं मृदूभूय शनैः शनैश्च रौक्ष्यं गतो दुःसहमुग्ररश्मिः
कुशासनो भूप इवाऽतिरूक्षै करैः विहस्यैव जगत् बबाधे

१

याते मधौ भर्तरि काननश्रीः शृङ्गारपुष्पाणि लतालकेभ्यः
वियोज्य, दैवात् गतवैभवेव दैन्यं गता प्रोषितभर्तृकेव

२

याते गुणग्राहितमे वसन्ते न कोकिलः कूजति मञ्जु मञ्जु
को वा कविर्भावरसैः विहीनं ग्रीष्मं नरं श्रावयते स्वगीतम् ?

३

यो ऽस्मज्जनिं स्वर्णमये प्रभाते ददौ, मधुः स क्व गतोऽधुनेति
बुध्वाऽपि चूतादिफलानि जग्मुः क्रमेण शोकादिव पीतभावम्

४

ग्रामे, पुरे, वर्त्मनि कानने च सर्वंसहा ऽन्तःसरसाऽपि देहम्
निष्कान्तिकं धूलिमयं बभार साध्वी समौना निकृता प्रजेव

५

सजीवता यस्य चले जलेऽभूत्, आकर्षणं पङ्कजसौरभे च
निरात्म तत् शुष्करसं सरोऽद्य शून्याम् अशोभां शवयत् बिभर्ति

६

परार्थयत्नाःसदयाश्च नद्यो नदाश्च नूनं जगतोऽस्य शान्त्यै
संशोष्य पानीयमयं स्वदेहं मासद्वयं शक्रतपः चरन्ति

७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूत्वा कणाः, सौरकरैश्च युद्ध्वा, स्वयँ विनश्याऽपि तदुग्रतापात्
नद्यो यथाशक्ति महीम् अवन्ति, स्यात् अन्यथा सा भस्तिताविशेषा !

८

रेणूत्कराः पादतलं तपन्ति, स्फुलिङ्गवत् सौरकराः ललाटम्
पठन्ति पान्थाः पथि घर्मतप्ते निरङ्कुशस्य क्षितिपस्य नीतिम्

९

तदा स्वगेहात् अनुकूलतल्पात् को निःसरेत् ! धान्यधनैः प्रपूर्णः
श्राम्यन्ति घर्मेऽपि बहिस्त एव ये निश्छला वर्गहताश्च सन्ति

१०

शीतोपचारैः व्यजनैश्च कश्चित् संसेवितो हर्म्यतले समास्ते
कश्चित् तदैव श्रमवारिधौतः क्षेत्रं खनत्यर्ककराभितप्तः

११

कश्चित् लतावेश्मनि कामिनीभिः छायानिले क्रीडति शीतशीते
कश्चित्तु भारेण विनम्रमूर्धा क्लेशात् पथि स्विन्नतनुः प्रयाति

१२

मन्ये निदाघं परमेश्वरस्य दिव्यं चरं कञ्चिदुदग्रभावम्
साम्राज्यवादस्य सपक्षपातां नीतिं य आख्याति रुषेव तप्तः

१३

ग्रीष्मे महीं शासति सागरान्तां स्वभावशीतौ अपि नीरवायू
प्रियं स्वधर्मं जहतुः ,भविष्णुः को नानुवर्तेत निदेशहस्तम् !

१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गे फणी प्राणिपदाहतोऽपि भीमां फणां नोन्नयते, मृगेन्द्रः
दशौ नवोदञ्चति, रूक्षनीतिः तेजस्विनो-प्यात्मबलं छिनत्ति !

१५

स चातको व्योमतले यथेच्छम् उड्डीयते देववदेव, किन्तु
न वेत्ति का नाम महोष्णसत्ता छायेव भूतस्य कदर्थयेत् तम् !

१६

सोऽयं निदाघेन कदर्थितोऽपि प्राणान् जिहासेत्, न चिरव्रतं स्वम्
आदर्शभूत; स महाव्रतस्य लोकोपदेशाय चिराय जीव्यात्

१७

मा मा शुचं चातक ! ते सहायो व्रता यकश्चित् चरति स्थलेऽपि
सत्याय योऽनन्तसुखान्युपेक्ष्य नग्नः, श्वसन् ग्रीष्मपथे प्रयाति

१८

चण्डातपं योऽविगणय्य कश्चित् अकिञ्चनो दीन इवाद्य काशीम्
पद्भ्यां व्रजन्नस्ति, स सार्वभौमः साक्षात् अयोध्यां विरेष याति

१९

तं नाऽद्य सामन्तगणोऽनुयाति, न चामरे वीजयतः पुरेव
छत्रं नवा चन्द्रिकयेव धौतम् छायाम् अजस्रं शिशिरां ददाति

२१

तथाऽपि नैतस्य महात्मनोऽस्ति काचित् मुखे संप्रति दीनरेखा
चकास्ति प्रत्युत रूपवत्याः सद्भावनाया इव दीप्तिलेखाः

२१

अग्रे नृपः, सा महिषी च पश्चात्, पुत्रः कदाचित् पितुरेव पार्श्वे
कदा च मातुः स जगाम पार्श्वे, एवं ययुः ग्रामपथे त्रयस्ते

२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकस्वरं स्वमिपतेर्मुखं तत्, किञ्चित् विषण्णं मलिनं महिष्याः,
उदास्तमन्यस्य च तत् त्रयं हि भावत्रयस्यैव निदर्शभूतम्

२३

कचित् विदेश्यान् क्षुधितान् अदीनान् एतान् मिलित्वा व्रजतो विलोक्य
ग्रामीणनार्यो गृहतोऽध्वपार्श्वं समेत्य पश्यन्ति मिथो लपन्त्यः

२४

किञ्चित् कृशा भद्रमुखा इमे के ? कुतो गमिष्यन्ति कुतः समेताः
एवं बुभुत्साऽऽकुलिता अपीमाः प्रष्टुं क्षमन्ते न च मुग्धभावात्

२५

तासां ततः काऽपि पटोलपूर्णं किलिञ्जकं शीर्षतले दधाना
वर्षीयसी दुग्धकचा नृपालं पप्रच्छ– कस्त्वं ? क गमिष्यसीति

२६

'साकेतभूमि र्मम मातृभूमिः, क्षत्रोऽस्मि कृत्या रविवंशजातः
पत्न्याऽनयाऽनेन सुतेन चाऽपि वाराणसीं याम्यधुना नु मातः ?'

२७

साकेतनाम्ना स्मृतभूपतिः सा पप्रच्छ भूयोऽपरिचित्य भूपम्
'भो पान्थ ! कच्चित् कुशली ? महिष्या समं स नो भाग्यरविर्नृपाल

२८

ईषत् विलम्ब्यैव जलाय मेघे वृष्टेऽपि यः कारुणिकः परादि
अर्थी न जग्राह करं पृथिव्याः, स्वर्गं गतः कोऽपि स देव एव

२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्भाग्यतो यद्यपि तं नृपालं नो दृष्टवत्यस्मि, तथाऽपि तस्य
जानामि सौहार्दमतः चिराय जीव्यात् स मे श्वेतकचाशिषेय

३०

तथा ऽतिकष्टेन चिरेण जातः स राजपुत्रो ननु कीदृशः स्यात्ः ?
यो जन्मना नोऽपि शुचं जहार, पित्रोः कियत् सोऽद्य मनो हरेत ?

३१

शृणोमि, राज्ञो विषये बहूनां ग्रामेष्वसंभाव्यकथाः चलन्ति
किन्त्वीदृशं देवहृदं निरस्य देवोऽपि कं राज्यपदे नियुङ्क्ते ?'

३२

राजाऽऽह-'मातः! भवती सदैवं येषां गुणं स्तौति हृदो वचोभिः
कथं न ते स्युः कुशलाः !, कथा का ? विनश्वरे देहधनादिके तु

३३

इत्येव संलप्य जगाम वृद्धा, राजाऽपि तस्या वचनेन भूयः
उद्बोधितस्नेह इव प्रजासु जग्राह वाष्पाकुलितः स्वमार्गम्

३४

स्नेहो हि दैवस्य मृदुर्वलीयान् निरक्षरः कोऽप्यमिचारमन्त्रः
विचाल्यते येन महात्मनोऽपि संकल्पघोरोऽपि विशाल आत्मा

३५

ग्रामोऽस्तु,मार्गोऽस्तु,तथा प्रपाऽस्तु सर्वत्र लोकस्य शुचातुरस्य
सैवाऽस्ति वार्ता-'स नृपो विपन्नः? साम्यस्य मूर्तिः,हृदयं प्रजानाम्'

३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नृपो ययौ स्वाख्यानि सर्वमेवम् शृण्वन्, स्वपत्न्या निभृतं लपन् च
शोचन्तु नो मां परिचिन्त्य लोकाः ! एवंविचारः पथिकैः अलक्ष्यः

३७

जातु श्रमेण, क्षुधया च कामं सन्तप्तयोः पुत्रकलत्रयोः सः
'क ग्राम एवाति' वचोऽतिदीनं शृण्वन् ससंरम्भतया जगाम

६८

प्रबोध्य तौ व्याकुलितौ नृपालो ग्रामाशयाऽग्रे चलितोऽपि सायम्
सुपक्वगोधूममयीम् अशालाम् प्रापत् समां क्षेत्रततिं स भूयः

३९

न तत्र वासादि नृपो ददर्श, ददर्श तं केवलमन्धकारम्
गोधूमपीतां भुवमप्यपारे कालिम्नि मन्दं परिवर्तयन्तम्

४०

अज्ञातपूर्वा सरणी, प्रगाढं ध्वान्तं, क्षुधार्तौ च कलत्रपुत्रौ !
भूपोऽपि किं हन्त ! तदा करोतु ?. विलक्षितः सोऽध्वनि मौनमास

४१

तथा विलक्षं नृपतिं विलोक्य मूर्तेव तद्दुर्नियतिः प्रहृष्टा
सौदामिनी व्योमनि हसहासैः कादम्बिनीसन्ततमसां विभेद

४२

विद्युत्प्रकाशेन ततोऽप्यदूरे च्छायाविशालं स समीक्ष्य वृक्षम्
उवाच भार्यां मुहुरुच्छ्वसन्तीं संम्मुत्य संस्मृत्य पुरोपभोगम्

४३

'प्रयाति वायुः, प्रचकास्ति पीता विद्युत् च तस्मात् अचिरेण नूनम्
वृष्टिर्भवेत्, प्रेयसि ! तत्र याम च्छायामय श्छत्रसमोऽस्ति वृक्षः

४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतादृशान् दैवहतान् अनाथान् को नाम रक्षेत् ! त्वदृते पृथिव्याम्
छायाऽस्ति ते संपदनन्यतुल्या संरक्ष तत् वृक्षपते ! त्वमेतान्

४५

लब्धा ऽनया निर्ममसेवयैव तरो ! पुन र्जन्मनि जन्मनि त्वम्
आकर्षणं स्वान्तहरं प्रशान्तम्, असीमितं शीतलमुच्छ्रयं च

४६

अनारतं वृष्टिरभूत्, वराको वृक्षः कियत् रक्षतु ! तान् विपन्नान्
झञ्झानिलान् तोयकणान् च शीतान् सोढ् वैव तेषां रजनी प्रयाता

४७

आश्वासयन् ग्लानपदां स्वकान्तां विपन्मयीभिः महतां कथाभिः,
दिवाकरे पश्यति पूर्वशैलात् भूपोऽपि जग्राह पुनः स्वमार्गम्

४८

छित्वा प्रकृत्या नियमान्, अकाले प्राप्तां द्विषन्तीमिव रात्रिवृष्टिम्
अशक्नुवन् सोढुमयं निदाघो जज्वाल भूयोऽन्यदिने प्रचण्डः

४९

कुर्वन्ति युद्धं प्रकृतेःविभिन्नाः मिथः सदर्पाःबलवत्प्रकोपाः
परन्तु किं तेन बलीयसां स्यात् ?, फलं तु तेष्वेव विधेर्हतेषु

५०

तप्तेषु केदारपथेषु,तेषां घर्मेण तालु कथितं, क्षुधा च
अन्त्राणि शुष्काणि, पिपासया च शुष्को गलो, हन्त ! कथं सहेरन्

५१

एकेन धर्मं व्यपदिश्य राज्यं गृहीत, मन्यस्य तथा विपत्तिः
न वेद्मि, जन्तुः निजदुर्विपाकैः क्लिश्नाति, किं वा परविप्रलम्भैः !

५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियन्त्रितोऽध्यात्मविचारजाले, सत्येन दासीकृत एष राजा
कष्टानि कामं सहतां स्वबुद्धया, देवी कथं हन्त ! मुधा सहेत

५३

स्वमातृजातेः यशसे, गरिम्णे, भूत्यै च देशस्य,कुलस्य चापि
अग्नौ, समुद्रे,ऽथ सुखप्रपूर्णे सौधे च पत्यैव सहाऽविशन्ती-

५४

स्थित्यै च तं स्वात्मतया श्रयन्ती; स्वतन्त्रतां तिक्तहलां स्मरन्ती
मर्यादया निर्मितभूषितेव धन्याऽतिधन्या ! खलु हिन्दुनारी !

५५

अष्टमः सर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवमः सर्गः

तृष्णानागीं विषयपयसा नो सदा पोषयध्वम्
लोका ! आगच्छत मधुमयीं शीतलाम् उत्तराशाम्
एवं संकेतनपर उदक् प्रस्थितो धीरधीरः
'कल्कल् कल्कल्' स्वनति मधुरं जाह्नवीयो जलौघः

१

प्रातः प्राच्या उदयकनकद्वारमुद्घाट्य देवी
सा स्वर्णोषा किरणपथतो मन्दगत्याऽवतीर्य
स्नातुं गाङ्गं सलिलमविशत्, तत्स्मितं व्याप तोयम्
केशाश्चास्याः कनकरुचिरा वीचिदृश्या अनृत्यन्

२

तीरोद्यानात् सिरिरिति वहन् शीतलश्चूतवातः
सुप्ता वीचीः त्रिदिवसरितोऽबोधयत्, पूगृ हान् च
वेत्ति स्थानं, मधुरशिशिरं गाहते चेत् सुमन्त्रः
एकोऽप्यात्मा भवति जगतः संप्रबोधे हि शक्तः

३

सौम्ये स्वर्णोषसि, मृदुतरे मारुते स्वर्झरिण्याः
भुग्ना भुग्नाः तरलतरला स्वर्णवीचीः विलोक्य
'हैमा नागाः कुत' इति परं विस्मिताः पक्षिणोऽपि
गङ्गातोयोपरि कलरवा मन्थरा उड्डयन्ते

४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राचीहर्म्यात् बहिरुपगतो भानुरेतां तु दिव्याम्
गङ्गां दृष्ट्वाऽधिभुवि, 'पतितां' भावयित्वेव पूर्वम्
रुष्टो रक्तः समजनि, पुनश्च पतेः सागरस्य
स्मृत्वेवाऽन्ते त्वरितममरां कीर्तिगाथां जहर्ष

५

'स्वर्गस्थेयं सततमतलस्पर्शणीया महत्वैः,
मर्त्ये प्राप्ता क्षरितविभवे कीदृशी स्यात् ?' इतीव
तत्वं प्रेप्सुः दिनमणिरसौ गोलबिम्बात्मना नो
मोघायासोऽप्यनुदिनमिमाम् आप्रदोषं जहाति

६

'कालं कालं निबिडतमसो विश्वमाहो ! क्व लुप्तम्
दीप्तं दीप्तं कनकरुचिरं विश्वमेतत् कुतश्च'
इत्याश्चर्यः स्थगितपुलकाः तत्र नक्राः प्रभाते
'घप्, घप्' कारं बहु सलिलमुच्छालयन्तश्चलन्ति

७

ग्रीष्मे स्वैरं शिशिर उदके वास, एवं विशालम्
स्वर्णं दृश्यम्, पुनरमरवत् निर्निमेषा च दृष्टिः
प्राप्ता मीना अपि विधिवशात् तत्र दिव्यां समृद्धिम्
'का वा जातिः सकृदभिमतां सपदं नो लभेत !'

८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अज्ञैः, प्राज्ञैः, धनिभिरधनैः, अन्त्यजैः, ब्राह्मणैश्च
भक्त्या दत्तं तृणमपि लघु स्वर्णदी श्रद्दधाना
हृष्टाऽऽदत्ते झषवलयितैः उद्यतैः वीचिहस्तैः
'भक्त्यामेव प्रणयिहृदया देवता, नेतरत्र

९

दुष्टान् कीटान्, कलुषमपि निर्मूल्य सर्वोपकारम्
कुर्वन्तीं तां मृदुलहृदयां स्वर्णदीं श्रद्दधाना
आर्या, म्लेच्छा अपि समतया संश्रयन्त्येव नित्यम्
'कां जातिं नो निजयति गुणः साधुरन्योपकारः !'

१०

निःस्वार्थोऽन्योपकृतिविभवोऽवश्यकर्तव्यबुद्ध्या
कार्यं कुर्वन्नपि न कुहरे मज्जतीतीव मौनम्
शंसन्तस्ते जलमृदुपथैः अधकूष्माण्डरूपाः
नावस्तूर्णा अमितपथिकान् धारयन्तश्चलन्ति

११

चित्रन्त्वेवं हृदयहरणे शान्तिपूर्णे स्थलेऽपि
दूरे मध्येसलिलमहरन् बालमत्स्यान् बकास्ते
ज्ञानं प्रापुर्नच कथमिमे ? स्वधुनी-स्वच्छतोयाद्
किं वा तीर्थं भवतु विमलं, नैव काकास्तु तत्र

१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यादेवाऽत्राप्यबलबलिनो भेदरात्रिर्घनान्ध्या
मातस्यन्यायस्त्वमरसरितो गर्भ एव स्थितः स्यात् !
स्वःसन्देशः महितमधुरं वेत्ति कोऽस्या निनादम् ?
स्नायात् अज्ञो बहुजन इह क्लेदमात्राय कामम्

१३

मातुः पृथ्व्या हरितमृदुलं कस्य नोत्सङ्गहर्म्यम् ?
तस्या बाहौ विशदवरदे मृण्मये वैभवे च
कस्य स्नेहो न भवति ? पुनः कस्य वाऽनाधिकारः ?
जाने नाऽहं-किमु तट इह क्षुत्परीता रुदन्ति ?

१४

ऊर्ध्वं चण्डस्तपति, जठरे वह्निरन्यः क्षुधार्तः
ताभ्यां क्रूरोऽन्यनिकृतिमयः सर्वतः सोऽनलश्च
नो वासो, नो शरणमपि हा ! कान्तिचैतन्यशून्याः
अस्तप्राणा, इव शवगणाः तत्र मूर्च्छन्ति दीनाः

१४

चुम्बित्वा तान् उपमुखगता मक्षिका आह्वयन्ति
रोगाः सालिङ्गनमचलितं नित्यसख्यं चरन्ति
मर्मच्छेदी परपरिभवोऽक्षय्यसंपत्तिरस्ति
तस्मात् तृप्ताः तनुमलमये मृत्यवे तेऽर्पयन्ति !

१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यासन्नो रिपुरिव तदा पूर्णिमावासरोऽस्ति
श्रान्त्वाऽऽनीतं तटभुवि कियत् भोज्यमासन्नमस्ति
तस्याऽदूरं सरसरसना वानरा उत्प्लवन्ते
आस्ते राजा मलिनवसनस्तत्र भार्यासुताभ्याम्

१७

आकारोऽभूत् मलिनमलिनः क्षुत्तृषाभिः, तथापि
नो जाने, ते पुर उपगतं किन्तु नाश्नन्ति भोज्यम् ?
गुन्गुन्कारं मिथ उपगताः कर्णगं संलपन्ति
मध्ये मध्ये व्यथितविकलं दीर्घमुष्णं श्वसन्ति ।

१८

दीना बाष्पाकुलितवदना धूसरा रूक्षकेशा
देवी भूमिं विलिखति नखैः अश्रुसिक्तैः अजस्रम्,
राजा निध्यायति, निमिषतः प्रायशो नाऽस्य नेत्रे
दूरे दूरे क्षिपति चपले लोचने रोहितश्च

१९

अग्रे कालं किमपि भयदं तूर्णमागच्छतीव
स्थैर्यं काञ्चित् दिशमभि चलच्चित्रवत् सर्पतीव
सर्पं सर्पं तमसि निभृतं शून्यता क्रामतीव
तेषां स्वरूपं क्षणमपि तदा हन्त ! कल्पायितं स्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मा स्थायी रिपुरतिबलो, मानसं भीमरक्षः,
देहो भारो, विकृतवदना भावना कुत्स्यक्षी
कालो व्याघ्रो:, प्रियसमुदयः सा स पृथ्वी श्मशानम्
भोज्यं तिक्तं, क समयहतो निर्वृतिं प्राप्नुवीत

२१

अन्यत,– दीनाः पुर उपगताः क्षुत्कथां वर्णयन्ति
राजा तादृक् सदय उदरे किं पतेदस्य भोज्यम् !
सर्वं दुःखं करुणहृदया दुर्भगास्ते लभन्ते,
तप्यन्ते ये सततमपरान् दुःखतप्तान् विलोक्य

२२

सर्वस्वेऽपि व्रजति सुतरां वज्रसारः स आत्मा
दीनान् दृष्ट्वा द्रवति घृतवत् कारणं स्यात् किमत्र ?
व्यक्तित्वं वा भवति महताम् ईदृशं, यत् पयोदः
वज्रात्माऽपि द्रवति धरणीं ग्रीष्मदीनां विलोक्य

२३

अग्रे कश्चित् व्रजतु विपदं, संपदं, वाऽथ मृत्युम्
आस्थाशून्या हृदयरहिता सैव कल्पेऽपि निष्ठा !
एवंकारं सततमजरं पूर्णसौभाग्यमाप्तुम्
भो पाषाणाः ! क रहसि तपः चोर्णमाहो भवद्भिः ?

२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्गो मार्गं न दिशतु, लिखेत् नेतिहासः स्वनाम,
व्यक्तिः वं स्वं तमसि निविडे संप्रलीयेत कामम्
मन्येऽत्यन्तं परुषहृदया यूयमानन्दभाजः
ते वञ्च्यन्ते मृदुलहृदयाः 'श्वो मयूरं' ब्रुवाणाः

२५

शान्तं वातं विपरिणमयन् प्रोद्धताभिः जटाभिः
रुष्टाकृत्या सभयमुदितां मङ्गलाशां निरस्यन्
रूक्षैः उच्चैः निजपदरवैः धैर्यसीमां विभिन्दन्
विश्वामित्रो नृपमुपययौ सार्धमेकद्विजेन

२६

पूर्वं धैर्यं तदनु नृपतिः, प्राक् भयं रोहितोऽन्ते
पूर्वं दैन्यं तदनु महिषी स्वागतं तस्य चक्रुः
सोऽपि प्रश्नैः परुषवचनैः प्राक्, ततः स्वात्मना च
जग्राहैषां करुणमृदुलं स्वागतं भक्तिधौतम्

२७

ज्ञात्वा क्रुद्धं स मुनि, मनतिक्रम्यमुत्प्रेक्ष्य कालम्
धृत्वाऽत्मानं, प्रकृतिविचलत् साधु संयम्य धैर्यम्
भृत्वा भाले विरहभयजान् कोमलान् स्वेदबिन्दून्
मर्माभिज्ञो नृपतिरगतिः सस्मितं प्राह देवीम्-

२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'वारंवारं पुरि, गुरुमुखात् संश्रुताभिः कथाभिः
जानास्येव क्षणसहसुखं जीवनं मर्त्यजस्य
तस्मात् कान्ते ! विमलहृदया तिष्ठ, मा याहि शोकम्
सङ्गे पुत्रो भवति विधुवत् सौख्यवर्धिष्णुरेषः

२९

चिन्ता माभूत् तव मम कृते; कालयोगात् अहं तु
विक्रीय स्वं, तत उपनयै दक्षिणां पूरयामि
कान्ते ! पश्चात् मम परवतः कुत्र गन्तव्यता स्यात्
सत्यक्रोडे श्रमविमलया तिष्ठ वृत्या सवत्सा

३०

स्निग्धं तत्, स्वं किरणविमलं जीवनं दास्यपङ्के
निर्बन्धात् मा क्षिप, विदुषि ! तत् स्वैरमेवं चकास्तु
भानोर्वंशे समजनि सुतोऽप्येष जीवेत् अपङ्कम्
यद्वा तद्वा भवतु, विधिना वञ्चितोऽहं प्रयामि'

३१

संप्राप्स्यन्ती विकटविकटं घोरमालिन्ययोगम्
निर्वेक्ष्यन्ती प्रियविरहजां वेदनां तामपूर्वाम्
सन्ध्येवेयं मलिनवदना भीतिकिञ्चित्कषाया
देवी प्रेष्ठं नृपकुलविधुं बाष्पकण्ठैवमाह

३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'नाथे दास्यं चरति नियमात् आवयोर्दासता स्यात्
दास्यां सत्यां मयि तु भवतो दासता दुर्भणैव
स्वल्पात् तुष्टे हि विधिहतके भूपते ! भूयसा किम् ?
तस्माद् आज्ञापयतु मुदिता यामि दास्येऽहमेव

३३

आज्ञां नाऽद्यावधि तु भवतोऽलङ्घयं प्राकृताऽपि
स्यां दुष्टैवाऽद्य तु नरपते ! नैव तां पालयामि
विक्रेष्यन्ती निजपतिमहो ! कीदृशी पापिनी स्याम्
'नारीधर्मो जयति समये भर्तुराज्ञाम् अयोग्योम्'

३४

दम्पत्योः तत् करुणकरुणं वाक्यमश्रान्तदैन्यम्
विश्वामित्रश्चपलकुटिलं वीक्षमाणः शृणोति
शीर्षं धुन्वन्, कपिलपरुषाम् आमृशन् श्मश्रुपङ्क्तिम्
अन्यो विप्रो मुनिसहचरो मध्यतः प्राह भूपम्—

३५

'तर्ह्यर्घस्ते भवतु चलितो, ग्राहकोऽस्म्येव राजन् !
दासी याताऽद्य मम गृहतो, देहि पत्नीं नयामि
किन्त्वेषा नो गृहपरिजनान् देववत् भावयेत,
संसेवेता,ऽनिशमलसतां क्ष्वेडवत् वर्जयेत,

३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किन्त्वेषा नो गृहपरिजनान् देववत् भावयेत
संसेवेत, ऽनिशमलसतां क्ष्वेडवत् बजयेत'
एतत् वाक्यं हृदयवचसा द्विस्त्रिरावृत्य मौनम्
राजा वाष्पैस्तरलनयनो गद्गदं प्राह विप्रम्—

३७

भार्या त्वेषा कुसुममृदुला कालतो लब्धदुःखा
सेवाधर्मं परमविदुषो प्रस्खलेद्वापि जातु
सेवाभिज्ञः श्रमपरिचितः श्लाकगात्रः पुरोऽहम्
अस्मि ब्रह्मन् ! ननु तव गृहे नास्ति मद्योग्यकर्म ?

३८

क्रीता चेयं यदि तव गृहे कर्मणे स्यात् न भूम्ने
तत् किं कुर्याः ? विमृश पुरतः प्राप्य बुद्ध्या भविष्यम्
नो चेत् अस्या, तव च निगिलेत् जीवनं वेदनैव
'तिक्तां हालां फलति हि कृतिः प्रागनाविष्टबुद्धेः'

३९

तत् श्रुत्वैवारुणमुख इदं कौशिकः प्राह भूपम्
'किं ब्रूषे भो ! तव वच इदं स्फोटयत्येव कर्णौ
राज्ञी भूत्वा सततमितरैः सेविता, मानिता च
का वा न स्यात् कुसुममृदुला, चन्द्रिकाकोमला वा !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आस्तां वा तत्, विमृश पुरतः तत्र— सर्वस्वदाने
योषिन्मूल्यं प्रभवति कथं ? दक्षिणापूरणाय
किं मां भिक्षुं स्मरसि नियमान् आगमान् योऽनपेक्ष्य
यावत्प्राप्तैरिह धनकणैः तुष्टतुष्टः प्रयायाम् !

४१

किं वा श्रुत्वा नृप, कलिकथां, तद्गतान् ब्राह्मणान् च
तादृक्षं मां स्मरसि ? धनिकैः क्रीतयज्ञोपवीतम्
अज्ञातस्वं, धनपरवशं, कातरं, स्वार्थदासम्,
कृत्यभ्रष्टं, मलिनचरितं, क्लिन्नमार्जारदीनम्

४२

राज्ञाऽप्रोचत् 'मुनिवर ! कथं तादृशं त्वां स्मरेयम् ?
पूर्णा भक्तिस्तव चरणयोरस्ति मे, तत् प्रसीद
अस्या मूल्यं प्रभवति न चेत् दक्षिणापूरणाय
मा गा रोषं, शरणमितयोः आवयोः मूल्यमस्तु

४३

एवं स्वैरं वहति पवने विकथालापपूर्णे,
तत्राऽसंख्ये सपदि रभसात् क्रेतृवृन्दे च सज्जे
अन्ते कालो विकटनयनो दन्तुरो भीमकायः
तत्र प्रेताधिप इव परः कोऽपि चण्डाल आयात्

४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धानुष्कं तं नृपति, मितरान् क्रतुकामान् कुलीनान्
तान् दृष्ट्वा च श्वपचपतिनोपेक्षिते स्वस्य कामे
शान्तो दान्तो नृपमणिरसौ चिन्तयामास सूक्ष्मम्
'दास्य कस्योचितमथ कुतो विश्वसेषा च सिध्येत्' ?

४५

अन्ते पश्यन् पुर उपगतं भग्नलक्ष्यं श्वपाकम्,
शक्तैर्वर्गैः विहतसरणेस्तस्य मर्म प्रजानन्
नम्रः सत्वप्रचुरहृदयः साम्यधौतान्तरात्मा
सत्यप्रेमा नृपतिरपि तद्दास्यमेवाऽनुमेने

४६

'हन्तैवं मा श्लथय नियमान् जीवनस्योज्वलस्य,
भाग्यं संकोचय न विततं, विस्मर त्वं न सत्वम्,
धर्मे, सत्ये, महसि, विभवे, भावनायां च शश्वत्
सीमा बद्धा भवति विधिना भूप तां मा विभिन्दि !

४७

नष्टाऽमूल्या शिरसि न मणिर्नैव नागेश्वरस्य
रिक्तीभूता न नव निधयोऽद्याऽपि यक्षेश्वरस्य
नोत्रा भग्नो दिव उपवने कल्पवृक्षो मघोनः
क्लीवां वृत्तिं श्रयसि किमहो ! वीर ! पुंसं धनुः क ?

४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्वा लब्ध्वा तव परिचयं सोऽपि काशीनरेशः
सेवेत त्वां गुणगणनिधिं स्वीयसिंहासनेन
तां स्वां जातिं, कुल, मतुलितं विक्रमं, गौरवं च
भूयो धर्मैः नृपसमुचितैः भूपते ! सत्कुरुष्व'

४९

एवं शब्दाः स्वहृद इव कुतश्चित् विदूरप्रदेशात्
उद्गत्याऽस्य क्षितिपतिमणेः प्राविशन् कर्णयुग्मे
सोऽपि द्राक् स्वैर्हृदयवचनैः तत् समाधत्त— 'मा मा
स्वार्थायाऽहं परजनपदान् क्लेशयिष्ये कदापि'

५०

नवमः सर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमः सर्गः

धृत्वा धृतिं, स्वं श्वपचाय शङ्किने विक्रीय, भार्यातनयौ द्विजाय च
ततश्च लब्धेन धनेन दक्षिणाम् ऋषेर्यथावत् निरवर्तयत् नृपः
१

वियोगकाले महिषी शुचाऽऽकुला महीपतिं केवलमश्रुसिक्तया
ददर्श दृष्ट्यैव निमेषशून्यया, शशाक नो किञ्चिदपि प्रभाषितुम्
२

चलन्ति रूक्षा अलकाः समीरणे, नासापुटः क्षुभ्यति रोदनारुणः
नेत्रे अनीवे इव तास्यतोऽचले, गौरं मुखं क्रामति शोककालिमा
३

न ते दृशौ प्राणपतिं जिहासतः, त्यक्त्वा न वा तं चरणौ यियासतः
चेत् स्नेहजालं हृदयात् न दूरयेत्, कथं नु दूराय गतिं लभेत सा !
४

क्रेता द्विजोऽथ त्वरयत्यनारतम् आहत्य मर्माणि वचःशरैः शितैः
सत्यं न यायात यदि सा पतिव्रता सहेत तान् भर्तृवियोग-कातरा
५

पतिव्रतायाः पतिरीश्वरः, प्रियं हृत्खण्डमेकं, सफलो मनोरथः
अद्वैतभावस्य शुभं निदर्शनं स्वयं कथं तद्विरहं सहेत सा !
६

परन्तु देवीं भवितव्यतां जनः कोऽवाऽतिशेते, भुवनं प्रशास्ति या
यस्या नियोगात् स्वपतिं विसृज्य सा राज्ञी बभूवाऽद्य परस्य किङ्करी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देव्या विषादात्म वियोगकातरम् तत् इङ्गितं मौनमयं, द्विजस्य च
निर्विश्य स्वावृत्ति कटु त्वरावचो नृपः प्रियां प्राह तदोचितं वचः

८

विलम्बसे प्रयसि ! किं ?, न मानसं संयोगतस्तृप्तिमुपैति जात्वपि
अस्त्येव यातव्यमतः शुचं त्यज, प्रयाहि विज्ञे ! निजकर्मणो गतिम्

९

ताः स्नेहतन्त्री हृदि मा विबाधय, नियच्छ चित्तं,जप सत्यमक्षरम्
परोक्षभावे हृदयं शनैः शनैः उपैति शान्तिं, न च मां स्मरिष्यति

१०

पुत्रोऽस्ति सङ्गे, द्विजबालकैः सह क्रीडन्नयं ते व्यपनेष्यते शुचम्
अहंतु चिन्त्योऽस्मि न ते,ममाऽपि तं स्नेहं हृदाऽस्मै वितर प्रवर्धताम्

११

सत्यात् परं नास्ति महत् जगत्त्रये स्नेह्यं च पूज्यं च शुभे ! विवेकिनाम्
चकास्ति तत् स्वात्मनिचेत् अलंशुचा,त्वय्यस्त्यह ते विरहस्यकाकथा

१२

इति ब्रुवन्तं धरणीपतिं हसन्, आकुञ्चयन् भ्रू युगलं, विडम्बयन्
निषाद आह-प्रमुखोऽसि वाग्मिनां करोषि रे ! कार्यमहो! कथं,चल

१३

अन्ते तु देवी नतमस्तका सती द्वौ अश्रुविन्दू दयितस्य पादयोः,
चित्रो समौनाश्रु मुखं च कीलवत् निधाय सा क्रे तृपदानुगा ययौ

१४

राजाप्यधस्तात् चरणौ विलोकयन्,वाचंयमः स्वं हृदयं मृदु स्पृशन्
परामृशन् विप्लुतमात्मजीवनम्, श्वसन् कदुष्णं श्वपचानुगो ययौ

१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वं तु देवी हृदयं न्ययन्त्रयत्, पश्चात् न शेके, न च यत्नमातनोत्
किञ्चित् गता स्नेहमयी पुनःपुनः निवृत्य तान् भर्तृपथान् व्यलोकयत्

१६

तदा न सा ज्ञातवती सहागतं सुतं, शुचा स्वं विकृतं च त तद्गतम्
विलुप्तसंज्ञेव विकीर्णकुन्तला विस्रस्तवस्त्रा पथि विह्वला ययौ

१७

देवी कपोतीव वियोजिता प्रियात्, नित्याथ वल्लीव पृथक्कृता मधोः
निध्यायति म्लानहृदेव केवलं तापस्य, शोषस्य च पात्रतां गता

१८

चित्तं तु नास्त्येव तदा तया सह, दृष्टिर्नवा गम्यपदानि वीक्षितुम्
उन्मानसा सा विषमोपले पथि शतं स्खलन्ती क्षतविक्षता ययौ

१९

शून्येन लक्ष्येण, निरात्मना हृदा क्वचित् प्रगाढेऽन्धपथे गतेव सा
मार्गं, ततस्त्यान् निलयान्, महीरुहान्, दिशश्च दृष्ट्वाऽपि ददर्श नो हृदा

२०

मार्गे सुदूरे समुपेत्य सा शुचा व्यचिन्तयत्- 'कीदृगहं प्रमादिनी !
शोकाकुला व्यस्मरमेव हन्त! तं प्रष्टुं 'वसेः कुत्र:, कदा मिलेः' इति

२१

परं परेच्छामनुवर्तमानया मया, तथा तेन च, कुत्र वा कदा
प्राप्यः स्वतन्त्रः समयः पुरेव हा ! मिथः सहार्दं मधुरं प्रभाषितुम्

२२

विधे ! समर्थोऽपि पुरैव किंनु माम् अमारयन् सेर्ष्यं इवोग्रवेदनम्
वज्रायितं भर्तृवियोगमद्य मे शीर्षे विनादोषमपि न्यपातयः !

२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचिन्तयन्त्येवमनारतं द्विजम् अनुप्रयान्ती महिषी सपुत्रका
प्रापत् प्रदोषे द्विजसद्म, यत्र सा स्वजीवनं धक्ष्यति दासताऽनले

२४

प्राप्यैव राज्ञी सह सूनुनाऽनमत् द्विजस्य पत्नीं सकुतूहलेक्षणाम्
आसीत् नतिः सा ऽन्तरभक्तिपूजिता, न कृत्रिमा किङ्करतासमर्थिनी

२५

द्विजेऽथ विश्राम्यति, दीपरोचिषा दासीमुखं साधु निरूप्य सस्मयम्
सा ब्राह्मणी प्राह पतिं-कथं न्वियं कुर्यात् गृहे कर्म मृदुः सुखेस्थिता

२६

कर्माक्षमे वस्तुनि फूत्कृतं धनम्, स्वयैव कार्यं गृहकर्म पुष्कलम् ?
एषोऽपि बालस्तृणसारणाक्षमः गृहव्ययायैव हि केवलं भवेत्

२७

शीर्षे समाः पक्वतराः कचा अपि, तथाप्यपक्वं वत ! गेहकर्म तु
वदानि किं वा; न वदानि वा कथं! निर्वक्ष्यत मे गृहकर्म कोऽनिशम्?

२८

आकर्ण्य तत् सा महिषी व्यचिन्तयत्-'त्रिया जितं गेहमिदं विबुध्यते
क्षुरस्य धारेव चलत्यहो! शिता जिह्वा गृहिण्याः, इह का स्थितिर्भवेत्!

२९

किंवा न तिष्ठानि कथं?' स्वकर्मणा दासीकृताऽत्रैव गृहे, भवत्विदम्
भर्तुर्वियोगम् सहमानया मया भेतव्यमाहो ! कतमात् नु संकटात्?

३०

आस्ता मितो, ऽन्यत्र नराधिपो भवेत् स कीदृशो कर्मणि, कीदृशो गृहे
एवं मृशन्त्येव पुनर्द्रुदा ययौ देवी स्वहार्देन जितेव भूपतौ

३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'राजाऽधुनाकिं नु विचिन्तयन् भवेत्?, कुर्वन् भवेत्किंश्वपचानुदेशतः
स्वार्थात् अशोचन् अपिमत्कृतेऽथ वंशोचेत्-वराकीरुदियात् कतीतिसः

३२

वत्सोऽप्ययं प्राणनिभो वियोजितः, कथंचरेत् स्वं मन आर्द्रवेदनः
प्रमात् सहास्तीति स पुत्रकं क्षणेक्षणे स्वपार्श्वेऽपिविलोकयन्भवेत्

३३

विचिन्तयन्त्येवमनन्यमानसा देवी निदध्यौ, न विवेद सा निजम्
अज्ञातमेवाऽक्षियुगात् स्रुतं जलम्, अज्ञातमेवोच्छ्वसितानि निर्ययुः

३४

मन्दं तमश्चेत् न पिबेत् दिवाच्छविं निदाघसन्ध्यामपि मन्दमारुताम्
विद्यात् कथं तापमयी! तमोऽपि तत् अन्तस्तमस्तान्ततयैव लक्षितम्

३५

भुक्त्वोत्थितेषु द्विजबालकेषु, सा तेषां विशुद्ध्यै सलिलं समार्पयत्
उच्छिष्टभाण्डान्यवचित्य सत्वरा संमार्जितुं चाऽरभताऽश्रुविक्लव

३६

प्राप्तो विदूरात् कियतः, क्षुधार्दितःस बालको रोहित आत्मनो व्यथाम्
नवे गृहे केन वदेत् कथं, दृशा स्वमातरं शंसति दीनदीनया

३७

आसीन्नु किं मातृकरे त्वतः परं! विनाश्रुपूरात् उत दीनदर्शनात्!
अतः स बालोऽपि निविष्टधीषणः शशाक भेत्तुं न मुखेन वेदनाम्

३८

तृप्तेषु तज्ञेहजनेषु गेहिनो देव्यै सनिर्बन्धमदत्त भोजनम्
तस्या गलो न न्यगलत्, सुतस्तु स आस्वादमास्वादमभक्षयत् क्षुधा

३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गलेन संलक्ष्यशिरेण संभ्रमात् सप्रीति भुञ्जानमिमं विलोक्य सा
देवी हृदाऽवोच-'दितः क मन्दिरं,स्निग्धं क वा लालनपोषणं तव?

४०

पुराऽपि भीत्या च पलायनेन च कालो गतो,ऽद्यापि तवेदृशी गतिः!
विस्मृत्य भाग्यं किल पूर्वजन्मनि, जातोऽसि कष्टैः सह रोमहर्षणैः

४१

माताऽपि दास्यन्यगृहे,पिताऽपि ते दासो,भवेत् काऽद्यतव प्रतिष्ठितिः
स्वश्वासमाच्छिद्यददत् पिताऽपिनासङ्गेऽस्ति,तत् जीवसि कंसमाश्रित

४२

दैवेऽनुकूले शतशः समाश्रया भवन्ति, रुष्टे तु न कोऽपि जन्मिनाम्
प्रागेव राज्ञा त्विदमीक्षितं,यतः प्रोचे स--'सत्यं शरणं व्रजेति'माम्

४३

सर्वं महिष्या करणीयमस्ति यत् उच्चावचं कर्म गृहे सदाऽपतेत्
परीक्षते सा गृहिणी तु तत्कृतम् तृणेन निष्कोष्य दतः, श्रुतीः अपि

४४

समाप्तमात्रे सकृदेककर्मणि सा तां पुनर्नोदयतेऽन्यकर्मणि
सर्वं समाप्तेऽङ्गणरिङ्गणाय तां वदेत्, न चैनां सहते सविश्रमाम् !

४५

कोषो न वृष्टोऽस्ति दिवोऽत्र सद्मनीत्येवं तुदन्ती गृहिणी नृपात्मजम्
बालं बिबुध्याऽपि तृणेन्धनादये दूरे सदा प्रेषयते ऽतिनिष्ठुरम्

४६

स बालको. किं विदधातु ! नित्यशः मात्रा सबाष्पाकुलितं विलोकितः
स्खलन् स्खलन् घासभरं वहन् कृशः पिपर्ति दुष्टस्य कुतूहलं विधेः

४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भर्ता कथं तिष्ठति कुत्र किंदृशः, पुत्रः समक्षेऽस्ति तथादृशः,स्वयम्
तथाऽस्ति, चित्रं महिषी कथं मनोधरेत्!,प्रशस्या खलु तत्सहिष्णुता!

४८

श्रान्ताऽपि गाढं दिवसे तथाश्रमैः निद्रां तु रात्रौ कथमाद्र वेदना ?
मासत्रयं यापितमर्धनिद्रया, चिन्तां विना किं शरणीकृतं तया ?

४९

एतादृशे सद्मनि जीवनं मया सदा कथं याप्यमहोऽतिकृच्छ्रतः
श्रान्त्वा मृतायामपि सर्वदा मयि सन्तुष्टिरस्त्येव न गेहिनीहृदि

५०

सा केवलं चिन्तति- 'मद्धनं गतं समीभवेत् कस्य कलेवराऽसृजा'
यथाऽस्ति तस्या.तनुरस्ति मे तथा,दास्येन किं गात्रमयोमयं भवेत्?

५१

ततोऽपि दास्याः सुत इत्यनादरं, हेलां च कुर्वन्ति सदा ममात्मजे
कर्मैव कर्मैव वदन् सदा स तु क्षपयन् शकुन्तेन समोऽभिदृश्यते

५२

ईषत् शिरोरुज्यपि गेहिनी शुचा भिषज्यति स्वान् तनयान् बहुव्ययैः
दास्यात्मजे स्युःकति तादृशा रुजःविचारयेत् कः,शमयेत् च यत्नतः!

५३

बालः कियत् खादति पक्षिसन्निभः क्षिप्तेन सत्यं कवलेन तृप्यति
तथाऽप्ययं साम्प्रतमक्षिसङ्करो जातोऽस्ति, सर्वं गृहमाहरेदिति

५४

मिथः प्रकृत्यैव चलन्ति बालकाः रुदन्ति, कर्षन्ति, पुनर्मिलन्ति च
भज्येत, नश्येत च किञ्चिदत्र वा दोषस्त्वनाथेऽस्ति ममैव पुत्रके !

५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रोऽस्ति सङ्के :परमन्यकर्मभिः प्रजग्धकाला, समयात् अकिञ्चना
क्षुधं न पृच्छामि,न वा परिष्वजे'धिक्धिक् परान्नं',परतन्त्रतां च मे!

५६

क्षुधा कपोती शिशुना यदुञ्छति कणान् प्रदोषे सुतरां रजोमये
वरं तथात्वं प्रतिमुक्तजीविकम्,धिक् धिक् परान्नं,परतन्त्रतां च मे !

५७

किन्त्वस्ति मेऽयं तनुजः कियद् मृदुः, प्रबुद्धभावश्च य एवमापदि
मग्नोऽपि,बालोऽपि,नृपात्मजोऽपिसन्नदीनतामञ्चतिवाचि,वाऽऽकृतौ

५८

एवंभविष्याम् अवगत्य मां विधिःपुराऽभवत् बद्धकरो हि सन्ततौ
बिद्याम् कथं तत् !,बत ! मातृसंज्ञया पुत्रोऽपि दग्धःपरतन्त्रतानले !

५९

नो दुष्कृतं नौ प्रथमं स्वतंत्रयोः पुत्रैषणायां, स तु दुष्कृती भवेत्
योऽन्येन बद्धोऽप्यनिरस्तबन्धनो दासीचिकीर्षुः प्रकृतीः अभीप्सति

६०

पश्यन्त्युपद्वारि करस्थ शोधनीं, वितर्कयन्त्येवमनर्थमात्मनः
देवी प्रबुद्धा गृहिणीगिरां द्रुतं स्मृत्वेव, भीत्वेव निरास सङ्करम्

६१

'शतं सहस्रं कति वा वदाम्यहं, नैकं दिनं, श्रान्तमहो ! मुखं मम
अस्त्येवमस्यास्तु गतं विचेष्टितं,साक्षात् अलक्ष्मीरियमाविशत् गृहे !

६२

म्लानं मुखं,साश्रु विलोकितं,विना बीजेन निध्यानमिदं च सर्वदा
अलक्षणायैव सहेत को गृही ! भवन्ति रुग्णाः, शिशवश्च सद्मनि

६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पापं न वाच्यं, गृहकर्म सुन्दरं, शीघ्रं च वर्वर्ति; नचोत्तरं क्वचित्
तुषारशुभ्राऽपि मुखाकृतिस्त्वियं क्रमेण सन्ध्येव तमोऽजिता कुतः ?

६४

मृतेऽपि पत्यौ क्रमशो मनोव्यथा विलीयते,ऽस्यास्तु पतिर्मृतो नहि
वियोगमात्रे तु कुतस्तथा व्यथा ! सत्यं ह्यलक्ष्मीरियमाविशत् गृहे!

६५

दशमः सर्गः

CC-0. In Public Domain. Digitization by eGangotri

एकादशः सर्गः

इतस्तु, तत् ग्रीष्मरविप्रतप्तम् गङ्गातटं, तत्र च तत् विशालम्
रूक्षं सुघोरं च महाश्मशानम् आस्ते यमस्येव गृहं द्वितीयम्

१

यायावराणां कियतां युगानां; नृणां च नानाविधकर्मसाक्षि
पुराऽपि सर्वप्रथमं यदेव चकार विद्वद्हृदि साग्रजन्म

२

मध्यन्दिने, सौरकरे शवानां यत्राऽस्थिपङ्क्त्यः परितो विकीर्णाः
तृप्तिं गतानां खलु नैर्ऋतानां द्रंष्ट्रा इवाऽभान्ति विशन्दहासाः

३

ते जीर्णजीर्णा विरलाश्च वृक्षा वेतालवासा इव तत्र सन्ति
अहर्निशं ये कति वा शताब्दीः श्मशानसाक्ष्यं विदधुर्न विद्मः

४

गाम्भीर्यमुद्राऽभिषदर्शनान्ता, लम्बो गलो, दूरदृशौ दृशौ च !
का वृक्षशाखा ननु का च भूमिः, सन्त्यत्र गृध्राः शवमात्रलक्ष्याः

५

कालातिकालाः, शवमांसपुष्टाः, मिथः प्ररुष्टा भषकाश्च यत्र
विलोकनादेव परान् दिवाऽपि यमस्य दूता इव भीषयन्ति

६

कति प्रदग्धाः, कति दग्धकल्पा, दाहाय नीताःकति तत्क्षणे च
एवं न तादृक् क्षणमेति तत्र, दैवात् यदैकोऽपि शवो न सज्जः

७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दन्दह्यते तत्र चिता शवानां, ज्वाला नभः क्रामति शोणभीमा
धूमो वसागन्धकटुर्भिनत्ति नासां, समीपे च तमस्तनोति

८

ज्येष्ठोऽस्ति मासः, परुषो निदाघः दर्पेण, शौर्येण, च शास्ति विश्वम्
निरङ्कुशं शासनमेकतन्त्रं प्राप्येव को नास्ति तदा न दूनः !

९

तत्राऽपि निर्बाधरविप्रपातात् तप्तेन लौहेन समोऽस्ति घट्टः
यत्रत्यधूलौ चणकोऽपि सम्यक् भृज्येत कस्तत्र पदानि यच्छेत् !

१०

ग्रीष्मः स, संतप्तशिलः स घट्टः, मध्यन्दिनं तत्, ज्वलिता चिता सा
परन्तु सोढ्वा स मन्दभाग्यः एकः शवान् संस्कुरुते तदापि

११

अभाग्यवानेष स एव राजा, सत्याय योऽनन्तपदानि हित्वा
विक्रीय पत्नीतनयौ, स्वयं च चण्डालदासो भवति श्मशाने

१२

स्वामी श्मशानाधिपतिः श्वपाकः श्मशानशुल्काहरणे, शवानाम्
दाहे च तं किङ्करमादिदेश, स निश्छलं पालयते नियोगम्

१३

सन्ध्ये च, रात्रिंच, दिनं च तूष्णीं प्रवर्ततेऽसौ मृतकस्य दाहे
न तत्र कश्चित सहकृत; न बन्धुः, प्रष्टा न वा तस्य तृषः क्षुधश्च

१४

नास्ति श्मशानात् अपरोऽस्य वासः कौपीनवस्त्रात् वसनं च नान्यत्
कियत् हतोऽसौ विधिना निदाघे नाऽस्ति जलस्याऽपि च पात्रमेकम्

१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रीष्मे तु नाना शिशिरोपचारान् कुर्वन्ति पौरा इह तापशान्त्यै
तथा सुयोगोऽस्य कुतोऽधुनाऽपि सोऽयं धमत्यस्ति मुहुश्चिताग्निम्

१६

अङ्गारकालोऽतिकृशश्च देहो नेत्रे गभीरे, जरठाश्च केशाः,
स्विन्नं च शुष्कं च पले पले तत् यज्ञोपवीतं च त्रिलोकपतेऽस्य

१७

धूमोऽजिसैलं तनुमावृणोति, ज्वालाऽहिजिह्वे व विलेढि वक्त्रम्
स्वेदस्य धारा निटिलात वहन्ती गण्डौ स्पृशन्ती पुनरेति शोषम्

१८

मृतात्मनो ज्ञातिकुटुम्बकानां कोलाहलैः शोकमयैः अजस्रम्
शवक्रियाभिश्च निरन्तराभिः सुप्त्यै न कालोऽस्ति, न भोजनाय !

१९

'सत्यां क्षितौ किं कशिपोः प्रयासैः बाहौ स्वसिद्धे ह्युपबर्हणैः किम्'
विद्वांस एव ब्रुवते गिरैव, प्रदर्शितं तेन तु कर्मणैव !

२०

गीतिः क्व साऽद्य स्तुतिपाठकानां ? कुतोऽयमेकान्तकटुः श्वरावः ?
गतं क्व हर्म्यं सुधयेव लिप्तम्, ? श्मशानमेतत् च कुतोऽस्थिपूर्णम् ?

२१

स्निग्धौ सदोत्कौ महिषीसुतौ क्व, विश्वस्तमन्तःपुरमस्ति तत् क्व ?
तुष्टप्रियाः क्व प्रकृतिः ?, स्वपार्श्वे कुतोऽद्य गृध्रा भषकाश्च भूताः ?

२२

परं पुरा राज्यसुखे स्थितोऽपि, दैवात् पुनस्तां विपदं गतोऽपि
सर्वत्र सत्यानुभवात् प्रहृष्टः स स्वस्थितौ शोचति नैव किञ्चित् !

२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वदुर्दशाया विषयेऽव्यवेगाः ता जातुमात्रप्रभवाः शुचस्तु
अत्यल्पकुल्या इव तोयधिं,तं ज्ञानाम्बुधिं नाऽविलयन्ति किञ्चित्

२४

आयातु कामं जनताऽत्र, किन्तु द्वौ एव राज्ञोऽस्य सदा सखायौ
अन्तः स्फुरन् ज्ञानमयो विवेकः, बहिर्ज्वलन् सैष चितानलश्च

२५

अहर्निशं रोगयुजां शवानां काराणुदाहैः जनमात्रसेवाम्
कुर्वन् स भूपो हृदि वर्धमानां सेवातृषं स्वां विनयन्निवाऽस्ति

२६

अथात्मनो बन्धकरीम् अनर्थाम् संकीर्णतां प्रास्य विवृद्धसत्वः
ममत्वशून्यः स निरीहभावैः उपासते मानवतां सकार्यम्

२७

कुटुम्बतो जाति, मतश्च देशो प्राप्ता नृपालस्य दृगद्य तं च
अतीत्य विश्वे प्रययौ विशाले; 'सतां दृशो नैव पतन्ति केन्द्रे'

२८

व्यग्रं सदा लोकहिताय चित्तं, सेवापरं द्वन्द्वसहं शरीरम्
सत्येन पूतं वचनं च बिभ्रत् स एव मूर्तं त्रिविधं तपोऽभूत्

२९

राज्यं गतं तस्य, गतं कुटुम्बं, सर्वं गतं किन्तु ततोऽपि दिव्यम्
वर्वर्ति किञ्चित् धनमात्मकोषे, यस्यैव गुप्त्यै स जहौ समस्तम्

३०

न्यक्कृत्य सर्वा अपि ता विभूतीः सत्ये हुतोऽनेन निजो यदात्मा
न तेन तस्यैव यशोऽस्ति, किन्तु तत् भारतस्यैव हि पुण्यभाजः

३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न भारतस्यैव जनस्य, किन्तु स मर्त्यमात्रस्य यशः कोऽभूत
यतः श्रुतो न त्रिदिवेतिहासेऽप्यनेन तुल्यः किल सत्यवीरः

३२

सैषोऽस्ति, सर्वप्रथमं य एव मनुष्यमात्रस्य हितेच्छुरुर्व्याम्
जयाय, भद्राय, विभूतये च प्राकाशयत् सत्यमयं प्रदीपम्

३३

सैषोऽस्ति, सर्वप्रथमं य एव शीतादिकद्वन्द्वजयेन विश्वम्
मर्त्यात्मनो दर्शितवान् विशालं सत्वं, ह्यदस्यत्व,मजेयतां च

३४

सैषोऽस्ति,यः प्राक् असुरात्मभाजां बलीयसीः पाशविकीश्च शक्तीः
समूलमुन्मूलयितुं द्रढिष्ठम् अशक्तिकेभ्योऽदित सत्यमस्त्रम्

३५

तपोमयं शक्तिमयं च तत्र नृपस्य वातावरणं ब्रवीति -
'लोका! न गर्वं वहत स्वभाग्ये,कस्याऽपि न स्थायि भवेत् गुरुत्वम्

३६

प्रपश्यत प्रातरहर्मणेः का तेजस्विता, शासनपद्धतिश्च
आसीत्, पुनः केन हृता प्रदोषे ?,कस्यापि न स्थायि भवेत् गुरुत्वम्

३७

व्योमाजिरे वा निशि तारकाणां का दीप्तिरासीत्, मधुरा च खेला ?
प्रातः कुतस्तत् जगदेव लीनम् ?, कस्यापि न स्थायि भवेत् गुरुत्वम्

३८

नदीषु कूलङ्कषता क्व लीना ? वनेषु वा श्यामलता क्व लीना ?
ग्रीष्मेऽद्य किंभो जगदेव रुक्षम्!कस्याऽपि न स्थायि भवेतगुरुत्वम्

३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकातपत्रं क भुवः प्रभुत्वं, क वा विगीतं श्वपचस्य दास्यम् !
स्फुटं हरिश्चन्द्रकथा ब्रवीति- कस्याऽपि न स्थायि भवेत् गुरुत्वम्!
४०

परन्त्विदं सत्यतयाऽवधार्यम्- 'परिस्थितेः दुःखमुपैति मर्त्यः
परिस्थितिः सा च कुतोऽप्यदृष्टात् नाऽयाति, किन्त्वेति समाजपापात्
४१

परं सपापोऽपि समाज एव न जातु निन्द्योऽपितु शोध्य एव
समाजशुद्ध्यैव चिराय देवाः प्रापुर्दिवं, सौख्य, ममर्त्यतां च'
४२

× × +

पूर्वार्धभूधुर्यमिमं नरेशं प्राप्येव सूर्योऽर्पितकार्यभारः
पश्चाधभूमेः अवलोकनाय यास्यन्निवास्ताचलमाविवेश
४३

विवस्वतः शोषनयेन साधु प्रजागृतानां पृथिवीकणानाम्
शान्त्यर्थिनी कान्तिरिवाऽतिधीरम सन्ध्या भुवं स्पृष्टवती, दिवं च
४४

ग्रीष्मेऽत्र तीरे मनुजाः श्रमन्ति वातेन, गङ्गाम्बुकणैश्च शीतम्
करे नृपे गच्छति शान्तिकालं यथा दिनेशे व्रजिते प्रदोषम्

४५

तदैव काशीपतिरत्र भूपं द्रष्टुं ससाधारणवेष एत्य,
स्मृत्वाऽस्य वीर्यं, प्रविलोक्य सत्यम्, अन्तः प्रशंसन् बहिरेवमाह-
४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'शृणोमि साकेतपुरे प्रजानाम्, नृपस्य गाधेस्तनयस्य चापि
मिथो विरोधात असहिष्णुताऽस्ति, मुनिश्च राज्यं विजिहासुरस्ति
४७
तत् गच्छ तत्र प्रजया वृतोऽसि, त्वा मत्पुरो राजपदं गृहाण
चण्डालदास्यं तव नोचितं, तत् एतत् तु घातस्तव सत्यनाशिन्'
४८
तं भूपतिः सस्मितमाह- 'राजन्! दयाप्लुतः सन् करुणायसे यत्
सौजन्यमेतत्तव, किन्तु तादृक् शोच्योऽस्ति नो सत्यरतो ममात्मा
४९
लोकानुरोधेन पुराऽप्यहं तत् राज्यासनं स्वीकृतवान्,इतस्तु
विनैव राज्ञः पदमस्ततन्द्रः राजन्! विधित्सामि समाजसेवाम्
५०
स्वार्थे तु नो कस्यचिदप्यमूल्यं पदं जिघृक्षामि, बिभेमि सत्यात्
सत्यस्य,देशस्य,जनस्य वाऽद्य कावा समस्याऽस्ति तथा विधातुम्
५१
निरर्थकं राजपदं मत मे, नैवं वदाम्यद्य ततश्च्युतस्तत्रात्
भूयोऽपि तादृक् यदि कामये,तत् मत्कामुकं पूरयसे त्वमेव
५२
किं जातु दास्यस्य कलेवरस्य विभूषणे राजपदे नियन्त्र्य
अनन्तराकेः प्रभवः त्रिलोक्या आदर्शदः स्तिष्ठति मानवात्मा ?
५३
यथा शरीरेण समं श्मशाने जाति, कुलं वाऽथ ससंप्रदायम्
विलीयते राजपदं च राजन् ? तथैव, किं तत्र विलोभ्यताऽस्ति
५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करोति यः साधु समाजसेवाम् किं राजलिङ्गैः, स जनःप्रशस्यः
करोति यो वाऽद्य समाजबाधाम् किं राजलिङ्गैः, स जनो विनिन्द्य

५५

शान्ता,बुधा चेत् प्रकृतिः विशुद्धा,कोऽर्थो मुधा राजपदेन राज्ञः ?
कर्तुं तथा तां यदि वा न शक्तम्, कोऽर्थो मुधा राजपदेन राज्ञ; ?

५६

यदा हि सर्वत्र भुवि प्रशान्ता प्रकाशते सत्यमयी मरीचिः
तदा तु काऽवश्यकताऽस्ति राज्ञःपदस्य,शस्त्रस्य, दमस्य चापि ?

५७

राजन् अयोध्याविषये तु वार्ता सत्यैव चेत् सा प्रकृतिः प्रबुद्धा
देशाय, सत्याय सदैकलक्ष्या चेष्टेत राजान्तरमेव वर्तुम्

५८

युक्तं सतत,स्वं प्रकृतिःसमस्ता स्निह्येत्तु नचेत,गाधिसुतो वसेतकिम्
प्रजा च तं स्वप्रतिकूलनीतिं मुनिं वृथा राजधिया श्रयेत् किम ?

५९

कायेन,वाचा, मनसा प्रजानां निःस्वार्थसेवी यदि नोऽस्ति, तर्हि
घाताय, शोषाय, नियन्त्रणाय, दैन्याय राजा किमघाय कल्प्यः ?

६०

स लोकभक्तो यदि नास्ति; कोऽन्यः प्रजाः किमेकस्य नृपासुरस्य
तृषाशमायैव तनुं प्रियां स्त्रीं, कोषं, भुवं चाऽप्युपढौकयेरन् !

६१

स स्वानुकूलो यदि न प्रजा सा स्वतंत्रतां स्वाम् उपहृत्य तस्मै
आजीवन पञ्जरपक्षिवत् किं सदा परापेक्षितयैव जीवेत् !'

६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं वदत्येव नृपे: शवोऽन्य: समागतो,ऽथाऽस्य कुतोऽवकाश: ?
विसृज्य काशीनृपमस्तराग: स कर्मयोगी जगृहे स्वकर्म
६३

एकादश: सर्ग:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशः सर्गः

इतो राज्ञी भर्तृहीना दासीभूता द्विजालये
पदे पदे कियत दुःखं लेभे, जानीत कः समम् !

१

सा साध्वी पतिदेवं स्वं, सत्यं च तस्य जीवितम्
हृन्मन्दिरे पूजयन्ती नियोगं पर्यपालयत्

२

विलोकयेत यत्किञ्चित् कुस्वप्नं वा कुलक्षणम्
अनिष्टं शङ्कते पत्यौ, नार्यो हि दुर्बला हृदा !

३

सदने तत्र यत् किञ्चित् भग्नं वा विकृतं भवेत्
तस्याः शिरसि तत् सर्वम्, धिक् भृत्यत्वं परालये !

४

मिथ्यारोपः स, हेला सा, गृहिण्याः साऽकृतज्ञता !
मौनं त्रिशूले तिष्ठन्ती सा निन्ये दुःखवासरान्

५

एकत्रैव गृहे भिन्नं खाद्यं, भिन्ना स्थितिर्नृणाम्
तत्रैव बुबुधे राज्ञी वर्गौ द्वौ स्वामिदासयोः

६

नीराजनं प्रकुरुते, घण्टां वादयते द्विजः
न प्रेक्षते- 'स्वस्य गृहे को जीवात्मा कथं स्थितः ?

७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहे दुग्धापथ्ययोऽस्ति, प्रजापत्यादयोऽमराः
विस्मयन्तेऽग्निशिखया दास्या वालोऽत्ति भोजनम्

८

हृष्टाः पुष्टाश्च ते सन्ति सहैव द्विजसूनवः
हन्त ! दास्याः सुतत्वेन फूत्कृतोऽपि पतत्यसौ

९

द्वे भोग्ये तस्य बालस्य तत्र-स्वस्वामिसन्ततेः
अर्धजीर्णानि वासांसि, भुक्तशेषं च भोजनम्

१०

तुल्यत्वेऽपि मनुष्यत्वे धनिकत्वात् इमे सुराः
दीनत्वात् च वयं श्वान इति तत्र स बुध्दवान्

११

ज्ञाते बुध्देऽपि किं तेन यस्य रुद्धा सदा दिश
अशक्तस्य बहुज्ञानं चिन्तावर्धकमेव हि

१२

क्रीतोऽसौ गहेकार्याय, ततकृत्वैव दिनं गतम्
उद्यच्छेत् किं कथं कर्हि ? धिक् दास्यं गाढबन्धनम्!

१३

दलिता न्यायमन्वेष्टुम् अधिकारेण वञ्चिताः
अधिकारश्च मृत्वैव लभ्यः, केयं विचित्रता !

१४

शोषनीया बहुधनो, धनिकत्वेन शक्तिमान्,
शक्तिमत्वात् देवकल्पः, देवत्वात् सेवनीयता !

१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्रष्टारं दैन्यतत्त्वस्य धनिकानां नयं जनाः
अज्ञानेन, क्लीबतया, स्थितेश्च पर्युपासते
१६

वृत्तो शोषेण शिक्षाया नाशः, तस्मात् अजागृतिः
ततः स्ववर्गेऽसङ्गठनं, ततश्चाऽन्यायितन्त्रता !
१७

जीवनेऽहर्निशं दुष्टैर्दलिता अपि मानवाः
श्वआशया ऽद्य जीवन्ति, सत्यम् आशैव जीवनम्
१८

यत्रतत्राऽर्थपतयो रक्तपाः स्वार्थराक्षसाः
घ्नन्ति षड्यन्त्रखड्गेन मुष्टिस्थान् निर्धनान् सतः
१९

कल्पस्थायि यशो हित्वा देहे, द्रव्ये च नश्वरे
बद्धाशास्ते स्वात्महनो न हन्युर्वा कथं परम् ?
२०

स्वार्थ्येष ब्राह्मणो जात्या केवलं वादिसंसदि
विकत्थताम् आत्मवादम्, अज्ञात्वाऽन्यात्मनो व्यथाम्
२१

निरात्मवादिनो मान्या ईदृशात् आत्मवादिनः,
देहात्मानस्ते दयेरन् परदेहे, नहीदृशः
२२

इत्येवं तर्कयन्नेव रोहितः साश्रुलोचनः,
मातरं प्राह सविधे प्रलग्नां गृहकर्मणि
२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयाता बहवो मासाः, किमवस्थः पिता भवेत् ?
तिष्ठेत् कुत्र कथं ?, नित्यं नः स्मरेत् स वयं यथा
२४
तत् स्वामिनीं निवेद्यैव मां प्रेषय तदन्तिकम्
पृष्ट्वा पृष्ट्वा तत्स्थलेऽहं प्राप्स्ये तद्दर्शनोत्सुकः
२५
तत्र दुःखं तु किं दृश्यम्, तस्याऽपीदृक् दशा भवेत्
केवलं मनसःशान्त्यै मातर् ! यामि तदन्तिकम्
२६
अहं वक्तुं न शक्नोमि भैरवीम् इव कोपनाम्
निवेदय स्वामिनीं 'द्राक् प्रत्येष्यामीति' मद्वचः
२७
श्रुत्वा पुत्रवचो देवी हृदि विद्धेव केनचित्
अन्तर्व्यथां निर्विशन्ती प्राह त दीनलोचना-
२८
वक्ष्यास्येवाऽहं तु, परं वत्स ! वेत्स्येव पुष्कलम्
अतिदेवाः स्वामिनोऽस्मद्वचनं शृणुयुर्नवा-
२९
चिरं तु किं न मेऽपि स्यात् तेन संगन्तुमुत्सुकम् ?
करवाणि च किं वत्स ! स्मृत्वा वक्षो विदीर्यते
३०
अस्तु वत्स, ! नभः पश्य, गतो दूरं दिवाकरः
कुप्येयुः, गच्छ कार्याय, प्रार्थये तत्तु यत्नतः
३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतस्ततो,वीक्ष्य मन्दम् एवं मात्राऽभ्युदीरितः
रोहितो दारुघासादि संचेतुं निरगात् गृहात्

३२

पुत्रः प्रयाति कन्थाभिः साक्षात् सम्राज आत्मजः
कथं धरतु तन्माता क्षत्राणीत्वमयं इदम्!

३३

तुष्येत् सा यदि सोऽधीत्य सायमेयात् सपुस्तकः
ऊढघासः स्खलन् बाल.'सुत्' कुर्वाणो निवर्तते !

३४

स्वामिपुत्राः चलित्वैव खेलित्वैव प्रभुञ्जते
तथा श्रमेऽप्ययं गेहेऽ 'कर्मण्यो' 'ऽद्रमर' उच्यते

३५

इत्यादिर्वेदना राज्ञ्या अस्त्येव, पुनरद्य तु
तत्सन्ध्याक्ष्यपि पुरुफोर, तत् साऽत्यन्तं विशङ्कते–

३६

'इद्देवः स क्व दूरेऽस्ति पुरा राजसुखे स्थितः
दासीभूतोऽधुना हन्त ! कति दुःखानि निर्विशेत् !

३७

वियोगकालेऽपि कृशः स आसीत् प्रागपेक्षया
शङ्केऽधुना तु पत्रस्य पुरुषः स्यात् सचेष्टितः

३८

अकरोत् राज्यविभ्रंशं सव्याक्षिस्फुरणं पुरा
विधित्सत्यद्य किं दैवम्, को निषेधेत् तदीहितम् !

३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदाऽगमनकालस्तु व्यतीतो, रोहितोऽपि किम्
नाऽयात. यद्यपि तेऽन्येऽन्ये बालका अपि नागताः

४०

घासाद्यलब्ध्वा निकटे किं वा दूरं ययौ भयात्
अलाभे, स्वल्पलाभे वा गालीमत्ति स बालकः

४१

एवं देव्यां बलादेव भावाः शङ्कामलीमसाः
दुर्दिनेष्वाविला भङ्गा गिरिणद्यामिवाऽययुः

४२

× × ×

इतः श्मशाने सेवाऽस्ति स्थितिः आदर्शदर्शना
हृदि सत्यं, करे कृत्यम् किमन्यत् कर्मयोगिनः !

४३

यत् शङ्कते, भावयते लोकभूत्यै नृपो दिवा !
रात्रौ तदावर्तयन्ति तस्य तन्द्रा लघुक्षणाः

४४

तत्राऽयोध्याजनाः केचित् नयाय नृपमागमन्
स्वच्छाय पयसे हंसा इव मानसरोवरम्

४५

ऊचुस्ते-- 'नृपते ! मातुः अयोध्यायाः, विशां च किम्
कुशलं पृच्छसि ? वयं त्वां वीक्ष्यैव शुचाऽर्दिताः

४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशालताऽऽकृतेः काऽयात्, क्व गता भव्यता तनोः,
माता सा, स कुमारश्च क्व गतौ ! धिक् किमीक्ष्यते !

४७

देशस्थितिं तु किं ब्रूमः ? विश्वामित्रस्य शासनम्
संप्रदायाऽधारगतं समा क्लेशयते प्रजाः

४८

गतं मानं योग्यतायाः, गता बंधुत्वधारणा
सर्वत्रैव ब्राह्मणत्वम् एव मूर्धनि संस्थितम्

४९

अध्यक्षत्वेन सर्वत्र ब्राह्मणा एव संस्थिता
' परस्परं प्रशंसन्ति अहो रूपमहो ! ध्वनिः,

५०

न सन्ति नियता न्यायाः, न च न्यायाय संसदः
ब्राह्मणानां गिरो न्यायाः, ब्राह्मणा एव संसदः

५१

स्वच्छे नभसि नीहार इव तत्राऽपि तन्नयः
स्थानीयानां विकासस्य द्वेष्टा, रोद्धा च वर्तते

५२

शैक्षिकं नैतिकं चाऽपि विकासं तेन विघ्नता
किमप्यकीकृताः वृत्त्या स्वल्पया ब्राह्मणेतरे

५३

निर्वृत्त्योऽशिक्षिताश्च वृत्त्यै तच्चारतां गताः
जना बन्धून् विनाश्याऽपि दृढयन्त्येव तन्नयम्

५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिक्षाया योग्यतायाश्च मूल्यं हर्तुं स कौशिकः
पदे नियुक्तवान् उच्चे मूढान् अपि स्वसेवकान्

५५

तेन सर्वेष्वविश्वासात्, एकता विरहेण च
नोच्छृङ्खलं तस्य नयं रोद्धुं शक्नुवते प्रजाः

५६

पिशुनैः, कण्टकैर्न्यायैश्चाऽपि वन्दीकृता वयम्
नैव किञ्चित् मनोनीतं लिखितुं, भाषितुं क्षमाः

५७

असिधारेव तन्नीतिः कथं सह्येत सर्वदा
शरणं ते प्रपन्नाः स्मो जहि, पालय वा नृप!

५८

एवं तन्द्राभावनया प्रबुद्ध इव भूपितः
ददर्श चितिकाम् अग्रे ज्वलन्तीं तत्र, नैव तान्

५९

'सर्वं सत्याय, यत् प्रेक्षे कुस्वप्नं वा कुलक्षणम्
इति ध्यात्वा कर्मयोगी स स्वकृत्ये प्रवृत्तवान्

६०

कृष्णा रात्रिः, जगत् मौनम्, अज्योत्स्ना द्यौः सतारका
सन्ति साक्षीणि नृपतेः तत्र तीव्रं तपस्यतः

६१

कामाद्याः शत्रवः, पिष्टा, हृदः स्वार्थाः बहिष्कृता
तृणीकृता जगद्स्तुतिःअद्य तेन महात्मना!

६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिनत्तीव जगन्निद्रां, छिन्नत्तीव निशातमः
उनत्तीव शिलां दूरेऽकस्मात् क्रुष्टं श्रुतं तदा

६३

धीरंकिञ्चित् स्फुटं जातम् क्रन्दितं तत, क्षणेन च
आक्रोशन्ती काऽपि योषित् इत एतीति लक्षितम्

६४

क्षणेन च मृतं बालं वहन्ती, तं विलोक्य च
मुहुर्वक्ष स्ताडयन्ती, शुचा विप्लुतचेतना-

६५

रात्रीव मलिना, जीर्णद्वस्त्रा, व्याकीर्णमूर्धजा,
श्मशानशुनकै रोषात् प्रधाव्य क्षतविक्षता,

६६

व्यथाम् उपेक्ष्य तां सर्वाम् प्राणाधार ! ममात्मज !
मां त्यक्त्वा क प्रयासोति' विलपन्ती कृशीयसी,-

६७

मूर्तेव वेदना, साक्षात् विपत्तिरिव रूपिणी
एकाकिनी प्राप तत्र काचित् स्त्री विजने, निशि

६८

एकां दीनां च तां वीक्ष्य सदयः स नृपोऽवदत्-
'मातर् ! मा शोच, जगतो गतिरेषा, हृदा स्मर,

६९

के जङ्गमाः, स्थावरा वा सर्वं एव हि नश्वराः
एवं-प्रकृतिकं विश्वं ज्ञात्वा मातः शुचं त्यज

७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लता तु 'मम शाखाया नीडे स्निग्धः खगो वसेत्
इतीच्छेत्, स परं मुक्तोऽनन्ते कुत्र वने वसेत् !

७१

नीडं त्यक्त्वा खगे याते तन्नीडं वीक्ष्य सा लता
यथा न दूयते, त्वं च मा दूयस्व तथा सुते

७२

प्राप्तसिन्धोर्जलस्येव शिशोः प्राप्तपरात्मन.
न स्वस्य प्रभवे स्नेहः किं त्वमेवाऽत्र दूयसे ?

७३

इति भूपे सान्त्वयति प्राह सा साश्रया गिरा–
'भ्रातश्चण्डाल ! शक्नोमि नैव धारयितुं हृदम्

७४

त्वयाऽद्य ज्ञानवचसा शतधा बोधिताऽप्यहम्
कथं धरानि चित्तं भो ! ममाधारः सुतो गतः;

७५

स्वाराज्यसदृशं राज्यं गतम् इन्द्रपराक्रमः
पतिर्गतः, केवलोऽसौ पुत्रोऽपि फणिना हृतः

७६

मां विहाय क्व प्रयासि प्राणाधार ! ममात्मज !
उदश्रय दृशौ वत्स ! मातरं स्वां समाह्वय

७७

क्षणं रहस्त्वदालापात् तत् दास्यम्, सा तिरस्कृतिः
असह्य तां मया वत्स ! ते सोढव्ये इतः कथम् ?

७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनीय दारुघासादि प्रत्येयात् एवमाशया
तिष्ठन्तीं किं मातरं स्वाम् एवं शोके ऽयमज्जयः ?

७९

यावज्जीवं भारमूढ्वा, सोढ्वा गालीं परस्य च
अनैषीः दिवसान्, कस्मात् दोषात् त्वां दष्टवान् फणी ?

८०

पितरं द्रष्टुमेमीति वदसि स्म सहस्रशः
वत्स ! तातम् अदृष्ट्वैव विरता लालसा तव !

८१

हे स्वामिन् ! हे सत्यमूर्ते ! क्वाऽसि हे हृदयेश्वर !
स्वस्य प्राणायितं पुत्रं सकृत् आगच्छ चुम्बितुम्'

८२

श्रुत्वा तस्या गिरं राजा प्रत्यभिज्ञान-रोचिषा
दीनां पर्यचिनोत् देवीं, मृतं बालं च रोहितम्

८३

जीर्णकन्थं मृतं पुत्रं, दीनां भार्यां च विह्वलाम्
अग्रतो वीक्ष्य नृपतिः हन्त ! वक्ष कथं धरेत् !

८५

तदा वपुषि रोमाञ्चं, दृशोरश्रु, शुचं हृदि,
श्वासं च वक्षस्याधिकं न्ययच्छत् स वशेन्द्रिय

८६

क्षणं स्वं पर्यवस्थाप्य, सत्यं ध्यात्वा, स्खलत्स्वरः
रुद्धकण्ठो नृपः प्राह—'देवि ! तां तां शुच त्यज

८७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वामहं पर्यचिन्वम्, एष पुत्रोऽस्ति रोहितः
यं संबोधयसे देवि ! सोऽहमस्मि तवाऽग्रतः

८८

सर्वनाशेऽपि येनैव तोषोऽभूत्, सोऽप्ययं गतः
न जाने कियदुद्वेलं प्रकुप्यत्यावयोः विधिः

८९

प्रत्येति न गतः पुत्रो रुदितैः, क्रन्दितैरपि
नमस्तस्मै भगवते कालाय समवर्तिने !

९०

दाम्पत्यम् आवयोः दैवात् ईदृगेव तपोमयम्
जातं, सोढं वतत् सर्वं, सत्यं पालय सुव्रते !

९१

प्रमादात् व्यसनात् वाऽपि नाऽहमकल्पयं युवाम्
राज्यं यातं, सुतो यातो भवतः सत्यमेव मे

९२

एवं दुःखेऽपि दुःस्थित्या, सत्यं त्वं माऽऽक्षिप प्रिये !
'कर्मण्येवाऽधिकारस्ते मा फलेषु कदाचन'

९३

वचोभङ्ग्या, सत्यभक्त्या, स्वरात् च महिषी नृपम्
परिचित्य बहिष्प्राणम् इव तं परिषस्वजे

९४

विश्वस्नेहस्याऽऽकरं तं स्थितप्रज्ञं नराधिपम्
आश्लिष्य महिषी तस्मात् स्वभागं स्नेहमाददे

९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवी स्वीयां दुःखगाथां रुदन्ती तम् अवर्णयत्
राजा महात्म्यगाथाभिः दूनां तां समबोधयत्
९६
वराकी सा जीवने यत् यत् त्वं वदति, तत् समम्
अर्घं भाग्येन, भग्नाशा कथं बोधेत् निराश्रया !
९७
जीवने बलवान् बन्धः, आत्मघाते व्यतिक्रमः
दुर्भगा सर्वशून्या सा कथं बोधेत निराश्रया !
९८
तथाप्येतां शोकगाथां धीरं संक्षेपयन् प्रियाम्
अन्ते श्मशानस्य शुल्कम् अयाचत महीपतिः
९९
स्वामिनो प्रकृतिकूरा, कार्यलोपात् अमर्षिणी
सहायं न ददौ रात्रौ, न किञ्चित् शववेष्टनम्
१००
देहेऽस्त्येकं जीर्णवस्त्रं, शुल्कं किं हन्त ! साऽर्पयेत्
तेनाऽन्यतंत्रो नृपतो रुरोध शवसंस्कृतिम्
१०१
'राजसौधे जनित्वाऽपि, तथेदृश्यां विपद्यपि
नाप्नोः खण्डं वस्त्रमपि वत्स ! भाग्यं कियत् तव !
१०२
विलपन्तीं भूय एवं महिषीं प्राह भूपतिः—
'विज्ञाऽपि बोधिताऽपि त्वं किं मूढेव विदूयसे ?
१०३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजसौधा, राजवंशाः के वा सन्त्यजरामराः !
विप्लवः, प्रलयो, भङ्ग एष एव हि संसृतिः।

१०४

संसृतिं वीक्ष्य मा शोच बोध, मा निन्द पूजय
सत्यस्य केलिरेवेयं क्षणद्वन्द्वमयी प्रिये !

१०५

देहस्य खङ्गिनः किं स्यात् वस्त्रमप्यस्य दुर्लभम्
किं दुरापं देहिनस्तु, यस्य क्रीडास्थलं जगत् !

१०६

तत् देहोऽयं गतासुत्वात् बीभत्सवः, काऽस्य काम्यता !
स आत्मा चाऽनश्वरत्वात् प्रभुः, का तस्य शोच्यता !

१०७

तत तां शुचं विहायाऽत्र विधातुं शवसंस्कृतिम्
स्ववस्त्रार्धं विदार्याऽपि मर्मज्ञे ! शुल्कमर्पय

१०८

वेत्स्येवाऽहं पराधीनः शुल्कायैव नियोजितः
भार्याम्, अकिञ्चनां च त्वां जानन्नपि तदर्थये

१०९

बहु किं वच्मि, कल्याणि ! लपित्वैव निशा गता
अथ मैवं विलम्बस्व, किं वदेयुर्गृहे तव ?

११०

'ईशावास्य' मिदं सर्वं, कस्य राज्यं कुतो गतम् ?
का स्वता ! मयि पुत्रे वा, वसुधैव कुटुम्बकम् !

१११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत् राज्ये, मयि, पुत्रे च केन्द्रितां तां धियं त्यज
ममत्वम् अममत्वेन जय त्वम्, अशुचा शुचम्

११२

भूय एवं सङ्गमः स्यात् न वा, मेऽन्त्यं वचः शृणु
कायेन, मनसा, वाचा सत्यमेव भज प्रिये !

११३

महात्मनो भर्तु राज्ञां जिघृक्षन्तो निजात्मना
पुत्रं बलात् विस्मरन्तो, स्मरन्ती च पुनः पुनः,

११४

उज्जीवनाशया चैनं पश्यन्ती मुहुरेव सा
छेत्तुं स्ववक्षम् आरेभे महिषी शुल्कमर्थिता

११५

इतः शुल्कं प्रदित्सन्ती देवी, शव इतः सुतः
वीतैषण उदासीनो नृपश्चैतो विलोक्यते

११६

तदैव स्निग्धगम्भीरा व्योमवाणीह संश्रुता
'आदर्शनारि हे देवि ! मा मा शाटीं विदारय,

११७

पलेन च श्मशानस्य शुक्लयन्निव यामिनीम्
किञ्चित दिव्यं संमिलितं तेजः प्रादुरभूत पुरः

१८

कुतः किमिति सन्दिह्य ताभ्यां सोत्सुकमीक्षितम्
तेजःपुञ्जं तत् विभक्तम् स्पष्टं देहाकृतित्रये

११९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषाम् [आसीत् एकतमः ऋषिराजः स कौशिक,
इन्द्रः स्वराट् एकतर, एकश्च भगवान् यमः

१२०

तान् दिष्ट्यैव संप्राप्तौ विनीतौ नतमस्तकौ
तौ दम्पती यथाशास्त्रम् तान् विवक्षन् प्रणेमतुः

१२१

ततः स्वर्गाङ्गलस्थैस्तैः स्वदिव्यकिरणैः शुभैः
मर्त्यैस्तिहाल-भाजुं तं प्राहुरेकस्वराः सुराः—

१२२

राजन् ! धन्यमहो धन्यम्, धन्यं सत्यव्रतं तव,
धन्यम् आत्मबलं, धन्यं तपो, धन्या सहिष्णुता !

१२३

भू-भुँवःस्वः समे लोका आश्चर्ये विनिपातिताः
असिधाराव्रतं साङ्गम् अखण्डं चरता त्वया

१२४

समाप्ता ऽग्निपरीक्षा ते समाप्ता दुःखवासराः
भ्रान्ताऽस्माकं परीक्षेव, धन्यः सत्याग्रहस्तव !

१२५

प्राणिमात्रे स्वात्मभावः, तव क्षात्रं, सा च सत्यता ।
महात्मन् ! नैव पश्यामः देवेषु त्वयि चान्तरम्

१२६

धन्यवादोऽस्ति ते मर्त्या यदि सर्वे भवादृशाः
भूलोकः सर्वलोकानां मूर्ध्नि वर्तेत गर्वितः !

१२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यवीर ! सपत्नीकः पृथ्वीं प्राणिव पालय
अद्यैव वा स्वर्गमेत्य देवपंक्तिं सनाथय

१२८

आदर्शसाध्वि ! हे देवि ! त्वां प्रशस्य न शक्नुमः
सत्ये, पत्यौ च ते भक्तिं अध्येष्यन्ते सुराङ्गनाः

१२९

तव प्रेयान् एष पुत्रो मूर्च्छां तीर्त्वाऽयमुत्थितः
आलिङ्गैनं धीरपत्नि ! भाविनं चक्रवर्तिनम्

१३०

स्वर्गराज्यात् अमूल्यस्य सत्यस्य धनिनौ युवाम्
किं देयौ, कल्पकल्पान्तं यशो वां पारितोषिकम्

१३१

न स्मर्तव्यः स श्वपचः, न द्विजो, न च दासता
कल्पिता एव ते, स्वप्नान् इव विस्मरतं समान्'

१३२

राज्ञा सज्जनप्रष्ठय मुनेर्वाचं तथाऽऽययोः
प्रतिपद्य, क्षणं तेषु संकल्पाऽद्य निजं सुतम्-

१३३

'कामं परीक्षकाः राज्यं याचेरन् अनुवत्सतः
परं मया प्रदत्तं तु नैव आत्मनृतं भवेत्

१३४

तस्मात् वत्स ! विबोध त्वम्—ईदृगेव हि संसृतिः
क्वचित् घर्मः, क्वचित् छाया, क्वचित् रात्रिः, क्वचित् दिनम् !

१३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संरक्ष्य सत्यमादर्शम् उन्नमय्याऽत्मगौरवम्
भ्रातृसाधारणो भूत्वा प्रजाः पालय वत्सक !
१३५

एषा तपस्विनी माताऽन्या च माता धरा तव
भक्त्या सदैका भूयास्ताम्, उभये तव पोषिके
१३६

अन्यत् किं वच्मि, मे वत्स ! सदैतत् हृदये स्मर
'तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यचित् धनम्' !
१३७

ॐ तत्सत्

द्वादशः सर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

2

वाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Acc. No. 3252

Class No. 891-21 Book No. BRA

Author ब्राह्मण, पूर्णप्रसाद

Title सत्यहरिश्चन्द्रम

Due on	Borrower's Name	Returned no.

891·21
BRA

3252

MAHENDRA SANSKRIT UNIVERSITY 1986 AD

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu